1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

161536 The Bangalore Press

SASTHRAMUKTHAVALI - 11.

AVACHEDAKATA NIRUKTHI.

By

MAHAMAHOPADHYAYA

SRI GADADHARA BHATTACHARYA

With

DIDHITHI

OF

Raghunadha Siromani

EDITED BY

P. B. ANANTHACHARIAR

PRINTED AT THE

SRI SUDARSANA PRESS

CONJEEVERAM.

1901.

~~Price As. 0-8-0~~ 0-15-0

श्रीः ।

शास्त्रमुक्तावळी - ११

अवच्छेदकतानिरुक्तिः ॥

महामहोपाध्याय श्रीगदाधरभट्टाचार्य विरचिता ।

श्रीरघुनाथशिरोमणि विरचितया

दीधित्यासह

श्रीकाञ्ची प्रतिवादिभयंकर

अनंताचार्येण

परिशोधिता

श्रीसुदर्शन मुद्राक्षरशालाया ममुद्यत ।

श्रीकांची ॥

१९०१

इदानी मेतन्मूल्यम् - ०-८-०

श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

अवच्छेदकतानिरुक्तिः ।

दीधितौ - अवच्छेदकता निरुक्तिः ॥

नन्ववच्छेदकत्व मिह न स्वरूपसम्बन्ध विशेषः,

गदाधरीयम् ।

'प्रतियोगितानवच्छेदके' त्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितुमवच्छेदकपदस्य स्वरूपसम्बन्ध रूपावच्छेदकत्वपरता माक्षिपति (नन्वित्यादिना) " इह " - एतल्लक्षणे । घटकत्वं सप्तम्यर्थः ।। तथाच - घटत्वेन घटोभावप्रतियोगीत्यादि प्रतीति साक्षिकया घटनिष्ठप्रतियोगितया सह घटत्वादे रवच्छेद्यावच्छेदकभावरूपः स्वरूपानतिरिक्तः पदार्थान्तरात्मकोवा यः सम्बन्धविशेषः स इहलक्षणे नशक्य निवेशनइत्यर्थः । स्वरूपसम्बन्धविशेषात्मकावच्छेदकत्वाभाव घटितं निरुक्तरूपं नव्याप्तिस्वरूप मिति यावत् । "तेन रूपेण साध्यतायां व्यभिचारिण्यतिव्याप्ते" रित्यग्रिममत्रैव हेतुः । प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकव्यभिचारि साधारणत्वादिति तदर्थः । "प्रमेयधूमत्वे"त्यादिकं- "अतथात्वेने" त्यन्तं तत्र हेतुः । स्वसमानाधिकरणाभाव प्रतियोगिता निरूपित तादृशावच्छेदकत्वाभावव त्तादृशसाध्यतावच्छेदककत्वेनेति तदर्थः । सम्भवत्तादृशप्रतियोगितावच्छेदकताक धर्मापेक्षया गुरुत्वं प्रमेय

सम्भवति लघौ धर्मे गुरौ तदभावात्।

धूमत्वादे स्तादृशप्रतियोगितावच्छेदकत्वाभावसाधकं। तस्य तत्साधकत्वोपष्टंभकव्याप्तिमाह (सम्भवतीति) तस्मिन्निति पूरणीयम्। तथाच-लघुधर्मे तादृशावच्छेदकत्वस्य सम्भवइत्यर्थः। "गुरौ तदभावात" - तादृशावच्छेदकत्वाभाव नियमात्।

तथाच - सम्भवत्तदवच्छेदकताक धर्मापेक्षया यो गुरुः, स नतदवच्छेदक इति व्याप्तिरिति पर्यवसितार्थः। सम्भवत्तदवच्छेदकताकत्वं च तदवच्छेदकत्वबाधकशून्यत्वं। बाधकंच अवच्छेद्य प्रतियोगित्वासमनियतत्वम्। तथाच तत्प्रतियोगित्वादि समनैयत्यमेव सम्भवत्तदवच्छेदकताकत्वपर्यवसितम्। समनैयत्यघटक दळद्वयनिवेशात् घटपटान्यतरत्व महानसीयवह्नित्वा द्यवच्छिन्नाभाव प्रतियोगितायां न्यूनवृत्तिघटत्वादे रतिरिक्तवृति शुद्धवह्नित्वादे श्चावच्छेदकत्वासम्भवेन तादृशतादृशगुरुधर्मस्य नावच्छेदकत्वानुपपत्तिः। प्रतियोगिताया स्समनैयत्यंच प्रतियोगिताया अन्यूनवृत्तित्वे सति तन्निरूपकाभाव विरोधितावच्छेदकत्वरूप मवच्छेदकतानिर्वाहकम्। अतः सत्तात्वादे र्विशिष्टसत्ताद्यभावीयप्रतियोगित्वा न्यूनानतिरिक्तवृत्तित्वेपि तदभावविरोधित्वानवच्छेदकत्वा न्नतत्प्रतियोगितावच्छेदकत्वसम्भवः।

यत्तु – 'स्वावच्छिन्नसमव्यापकतावच्छेदक धर्मापेक्षया गुरुत्वमेवावच्छेदकत्वाभावसाधकतयाभिमतं, स्वसमनियतसत्तात्वाद्यपेक्षयागुरो र्विशिष्टसत्तात्वादेः प्रतियोगितावच्छेदकत्व निर्वाहाय स्वसमनियतत्व मुपेक्ष्य स्वावच्छिन्नसमव्यापकतावच्छेदकत्व निवेश' इति। तन्न, घटप्रागभावत्वावच्छिन्न समव्यापकतावच्छेदक घटत्वाद्यपेक्षया गुरो र्घटप्रागभावत्वादे रत्यन्ताभावप्रतियोगितावच्छेदकतया जातित्वाद्यवच्छिन्न समव्यापकतावच्छेदक तद्घटकसमवेतत्वाद्यपेक्षया गुरो जातित्वादे र्भेदप्रतियोगितावच्छेदकतयाच व्यभिचारात।

प्रमेयधूमत्व कम्बुग्रीवादिमत्त्व –

ननु – मेयधूमत्वं स्वावच्छिन्नधर्मिविशेषणतापन्न मेयत्वसहित धूमत्वं, सामानाधिकरण्यसम्बन्धेन मेयत्वविशिष्टधूमत्वंवा । उभयथैव तदवच्छिन्नसाध्यके नातिव्याप्तिप्रसक्तिः, शुद्धधूमत्वस्या वच्छेदकत्वे तादृशान वच्छेदकताया विशिष्टधूमत्वे दुर्घटत्वात् ; एकदेशपर्याप्तवृत्ते र्व्यासज्य– वृत्ति धर्मावच्छिन्नानुयोगिताकाभावस्य · विशेष्यपर्याप्तवृत्ते र्विशेषणान्तर वैशिष्ट्यावच्छिन्ना नुयोगिताकाभावस्य वा नभ्युपगमात् । शुद्धवह्नित्वादौ धूमादिसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वा पर्याप्ते मेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन मेयवह्निमान् धूमादित्या दावव्याप्तिविरहा, दित्यरुचेः कम्बुग्रीवादिमत्त्वा नुधावनम् ।

नचैवं प्रमेयधूमत्वावच्छिन्न साध्यके ऽ तिव्याप्त्यभिधान मत्य न्तासंगतमिति वाच्यम् । व्यासज्यवृत्ति धर्मावच्छिन्ना नुयोगिताकाभावा नभ्युपगमेन नानाव्यक्तिदण्डावच्छिन्नस्य व्यापकतानिर्वाहाय प्रतियोगितावच्छेदकापर्याप्त विषयत्वपर्याप्ति रनवच्छेदका– न्तार्थइत्याशयेनैव तदभिधानात् । कम्बुग्रीवादिमत्त्वंच घटत्वव्यंजक सं– स्थानविशेषः । घटत्वापेक्षया तस्य गौरवं - संस्थानस्य विजातीयावयव संयोगरूपस्या नन्तत्वात् , अनुगमकजातिविशेष सापेक्षत्वाच्च । घट– त्वस्य चैकस्य जातिरूपस्य निर्विशेषणकस्या वच्छेदकत्वे लाघवादिति ।

नच घटसामान्याभाव प्रतियोगितायां संस्थानविशेषस्या नव- च्छेदकत्वेपि तत्तत्संस्थानव दभावकूटप्रतियोगितासु प्रत्येकं तेषा- मवच्छेदकत्व मावश्यकम् , तत्रातिप्रसक्त घटत्वस्या वच्छेदकत्वा- सम्भवा दित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्त्यवकाश इति वाच्यम् । तत्तत्संस्था- नव तत्तद्घटाभाव प्रतियोगितायामपि घटनिष्ठ तत्तद्व्यक्तित्वस्यैव

घ्राणग्राह्य गुणत्वादे-

साक्षात्संबन्धेनावच्छेदकत्वसम्भवात् । परम्परासम्बन्धेन स्व-समवायि समवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणा नवच्छेदक-तया तादृशसम्बन्धेन संस्थानविशेषावच्छिन्न घटादिसाध्यके व्यभि चारिहेतावतिव्याप्ते र्दुर्वारत्वात् ।

ननु- मृत्पाषाणादिघटसाधारणं घटत्वं नैकम्, मृत्त्वपाषाणत्वादि-ना संकरप्रसगात्, इति तत्तज्जातिव्याप्यं नानैव । तथाच तथा-विध सकलघटानुगमक संस्थानविशेषावच्छिन्न प्रतियोगितायां न स्वरूपतो घटत्वस्यावच्छेदकता सम्भवः, न्यूनवृत्तित्वात् ; नाप्यनुगत-रूपान्तरावच्छिन्नस्य, तादृशरूपान्तर प्रवेशेन गौरवादित्यरुचेः घ्राणग्राह्यगुणत्वानुधावनं । घ्राणग्राह्यत्वं-घ्राणग्रहणयोग्यता, गुणत्वन्यून वृत्ति घ्राणग्राह्यजातिरूपा, साचातीन्द्रियेपि गन्धइति न गन्धत्वस्य दर्शित रूपवत्सामान्याभाव प्रतियोगिता सम नैयत्या नुपपत्तिः। तादृशयोग्यतामात्रस्योपादाने गन्धत्वसुरभित्वादिरूपाया स्तस्याः स्वरूपतो हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकतया तादृ-शजातित्वाद्यवच्छिन्नाया अप्यनवच्छेदकत्वं दुर्घटमिति तद्विशेष्यतया गुणत्वनिवेशनं । द्रव्यत्वादिहेतुकस्थलेच गुणत्वस्य शुद्धस्यापि हेतु-समानाधिकरणाभाव प्रतियोगितावच्छेदकत्वासम्भवात विशिष्ट-गुणत्वस्य गन्धत्वसमनियतस्य तादृशप्रतियोगितानवच्छेदकत्वम-क्षतमेवेत्यतिव्याप्ति सगंतिः । अथवा घ्राणग्राह्यगुणत्वं स्वाश्रयगु-णत्वव्याप्यजातिमत्व सम्बन्धेन घ्राणजन्यसाक्षात्कार विषयतावत्वमेव, गुणत्वव्याप्यजातिघटित सम्बन्धलाभाय गुणपदम् । नतुगुणत्वमपि विशे ष्यतया विवक्षितम् ।

एतेन गुणत्वस्य निरुक्तजातित्वावच्छिन्न गन्धत्वादिविशेष्यतया विव क्षितत्वे स्वरूपतो गंधत्वादे र्गुणत्वविशेषणताया मप्यतिप्रसंगात तादृश

रथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्य तिप्रसंगात् । नाप्य-
नतिरिक्तवृत्तित्वम् ,

जातित्वावच्छिन्नस्य विशेषणत्वानुधावनं निर्बीजमिति; दूषणमनवकाशम् । घ्राणग्राह्यगुणत्वं यथाश्रुतमेव ग्राह्य गन्धत्वरूपलघुधर्मसमनियततया न प्रतियोगितावच्छेदकमित्यपि वदन्ति ।

यत्तु अनवच्छेदकत्वं अवच्छेदकाविषयक प्रतीति विषयत्वम् , तथाचावच्छेदकता घटकसम्बन्धेन विशेष्यांशे अवच्छेदकप्रकारक प्रतीति भिन्ना साध्यतावच्छेदकताघटकसम्बन्धेन यादृशधर्मप्रकारिकाप्रतीति स्तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरितिपर्यवसितम् । एवंच प्रमेयधूमत्वादिप्रकारकप्रतीते र्धूमत्वादिप्रकारकता नियमा त्प्रमेयधूमत्वाद्यवच्छिन्नसाध्यके ऽतिव्याप्तिपरिहारः सम्भवति । नतु निरुक्तघ्राणग्राह्य गुणत्वाद्यवच्छिन्नसाध्यके , गन्धत्वादिक-मविषयी कृत्यापि सुरभित्वादिकं – सुरभित्वादिक मविषयीकृत्यापि च गन्धत्वादिकं विषयीकृत्य तादृशसाध्यतावच्छेदक प्रकारकप्रतीति संभवादिति ।

तन्न , तथासत्युक्तरीत्या दण्डिमान् द्रव्यत्वादित्यादावतिव्याप्तेः; प्रत्येकं सकलदंडमविषयीकृत्यैव दंडत्वावच्छिन्नदंडात्मकसाध्यतावच्छेदक प्रकारक प्रतीतिसम्भवात्। अथ प्रतियोगितावच्छेदकी भूता ये येधर्माः तत्तत्प्रकारक प्रतीतिभेदकूटस्य साध्यतावच्छेदकता घटकसंबन्धावच्छिन्न साध्यतावच्छेदक प्रकारिकाया मेकप्रतीता वसत्वात् तथैवच लक्षणे विवक्षितत्वा न्नेयमतिव्याप्ति रिति चेत्? तर्हि तादृशरीत्या निरुक्तघ्राणग्राह्यगुणत्वावच्छिन्न साध्यकेपि नातिव्याप्त्यवकाश इति ।

" अतथात्वेन " – प्रतियोगितानवच्छेदकत्वेन । (अनतिरिक्त वृत्तित्वमिति) स्वव्यापक तत्कत्वमित्यर्थः । तच्छून्यावृत्तित्व विवक्षणे समवायेन प्रमेयसाध्यके व्यभिचारि ण्यतिप्रसंगात् । प्रमेय

सामान्याभाव प्रतियोगिताशून्या प्रसिद्धया प्रमेयत्वादेः तादृशावच्छेदकत्वा निर्वाहात। महानसीयत्वादिविशिष्ट वह्नित्वाद्यवच्छिन्न साध्यके धूमादौ वह्नित्वादे र्महानसीय वह्न्याद्यभाव प्रतियोगिताशून्य वह्न्यन्तर वृत्तितया विशिष्टेपि तत्र तच्छून्यावृत्तित्वस्य दुर्घटतया ऽतिप्रसंगाच्च । स्वव्यापक तत्कत्व निवेशनेच विशिष्टस्याविशिष्टस्य वा यादृशस्यावच्छेदकत्व मभिमतं तादृशस्यैव स्वपदेनोपादेयतया विशिष्ट वह्नित्वादिकं प्रति विशिष्टवह्न्याद्यभाव प्रतियोगिताया व्यापकत्वस्या क्षतत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः । ईदृशं यद्यत्स्वं तत्त्वाभावकूटस्यच साध्यतावच्छेदक विशेषणता बोध्या, अतः स्वत्वाननुगमेनैक सामान्याभाव निवेशासम्भवा द्यत्किंचिदेकावच्छेदक निष्ठावच्छेदकत्व मादायाति प्रसंगानवकाशः ।

नच – स्वपदस्य तत्तद्व्यक्ति परतया ऽवच्छेदकनिष्ठं तत्तद्व्यक्तित्वमेव पर्यवसित मवच्छेदकत्वं , तथाच विशेषणावच्छिन्ननिष्ठ तद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादे रवच्छेदकत्वे शुद्धस्याप्यनवच्छेदकता दुर्भिक्षमिति वाच्यम् । शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता ऽभावप्रतियोगितानिष्ठ व्यापकता॰ शरीरे निविष्टा, तादृशरूप पर्याप्तावच्छेदकता पर्याप्त्यनधिकरणत्व स्य साध्यतावच्छेदक विशेषणत्वोपगमात् । मेयधूमत्वादि पर्याप्ताया अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधाया विषयताद्यवच्छेदकतायाः प्रसिध्याऽतिव्याप्त्यनवकाशात्। महानसीयत्वादिसहित वह्नित्वादिपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वादा वपर्याप्तत्वा द्विशिष्टव ह्न्याद्यभाव मादाय दोषानवकाशात् ।

अत्र – यदि हेतुसमानाधिकरणाभाव प्रतियोगिता सामान्यानतिरिक्तवृत्तित्वं निवेश्यते , तदा निखिलवह्न्यादेरेव धूमादिसमानाधिकरण विशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्याप कतावच्छेदक तादृशप्रतियोगितात्वकत्वरूप तादृशप्रतियोगिता सामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्ति

प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् । न च तथाविध यत्किंचिदेकाभाव प्रतियोगितासामान्यशून्यावृत्तित्वं तत्, अतएवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि

रिति तादृश यत्किंचि देकप्रतियोगिता नतिरिक्तवृत्तित्वं स्व समानाधिकरण भेदप्रतियोगितानवच्छेदक तादृशप्रतियोगिताकत्व रूपं निवेशनीयम् ; तथा सति धूमवान् वह्ने रित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वं नस्यात , धूमादिसामान्याभाव प्रतियोगिताया अपि धूमादिस्वरूपतया प्रतिधूमादिकं भिन्नत्वेन प्रत्येकं धूमत्वादिसमानाधिकरण भेदप्रतियोगितावच्छेदकत्वादिति तत्ताद्धूमत्वादेरेव तथात्वादतिव्याप्ति रित्याह (प्रतियोगिताया इति) " स्वरूपसम्बन्धात्मिकाया" इति प्रतिव्यक्तिभेदप्रयोजकहेतुगर्भं विशेषणम् । अतिरिक्तपदार्थरूपप्रतियोगितायाः सिद्धान्तविरुद्धत्वादिति भावः । तादृशप्रतियोगिता सामान्यानतिरिक्त वृत्तित्वनिवेशेपि हेतुसमानाधिकरणाभावत्वेन तादृशाभावनिवेश एव पूर्वोक्तदोषः , नतु तादृशाभावस्य प्रातिस्विकरूपेण निवेशने, तत्तद्विशेषाभाव प्रतियोगितात्वस्य वह्नित्वादिव्यापकतानवच्छेदकत्वा दित्याशयेना शंकते (नचेति) (तथाविधेति) प्रतियोग्यनधिकरणहेतु मद्वृत्तीत्यर्थः । "यत्किंचि" त्पदं तत्तद्व्यक्तित्वेना भावनिवेशलाभाय । प्रत्येकंनिविष्टस्यापि तथाविधाभावस्य सकलस्य नैकत्रावच्छेदकताघटकता, किन्त्वेकस्यैवेति स्फोरणाय एकपदम् । तादृशप्रतियोगिता सामान्यशून्यावृत्तित्वं स्वव्यापकतावच्छेदक तादृशप्रतियोगितात्वकत्वम्, अतो न पूर्वोक्तदोषः । " अत एवं "- ईदृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेव (अतिरिक्तेति) सामान्याभावस्य विशिष्टाभावकूटातिरिक्तत्वानभ्युपगम इत्यर्थः । (धूमत्वादेरपीति) विशेषाभावकूटान्तर्गत मेक मभाव मुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपपादनासम्भवादितिभावः (तत्साधनमिति) सामान्याभावस्या तिरिक्तत्वव्यवस्थापन

साधु संगच्छतइति वाच्यं; वह्निघटवृत्तिद्वित्वतार्णातार्ण दहनवृत्तिद्वित्वाद्यव च्छिन्न प्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादा

मित्यर्थः (संगच्छत इति) अन्यथा स्वरूपसम्बन्धरूपावच्छेदकत्व निवेशे विशेषाभावकूटातिरिक्त सामान्याभावानभ्युपगन्तृमतेपि विशेषाभावीय प्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नतया धूमत्वादावपि वह्न्यादिसमानाधिकरण धूमादिविशेषाभावप्रतियोगितावच्छेदकत्वेना तिव्याप्त्यप्रसक्त्या सामान्याभावपार्थक्यव्यवस्थापनस्य एतल्लक्षणाप्रसक्तत्वे नानुपयुक्तत्वापत्ते रिति भावः ।

नचा तिरिक्तसामान्याभावाभावे उक्तरीत्या अतिव्याप्तिविरहेपि यएव वह्न्यभावा ह्रदादौ वह्नि र्नास्तीति बुद्धिंजनयन्ति प्रत्येकं धूमसमानाधिकरणानां तेषां प्रतियोगितावच्छेदकत्वं वह्नित्वे प्यस्तीत्यव्याप्ति र्दुर्वारैवेति तत्साधनसंगत्या उपष्टम्भसंगति रिति वाच्यम् । हेत्वधिकरणवृत्तित्वावच्छेदेन यादृशधर्मावच्छिन्नत्वविशिष्ट प्रतियोगिताकत्वं अतादृशत्वस्य साध्यतावच्छेदकविशेषणतां स्वीकृत्य तादृशाव्याप्ते र्वारणसम्भवात् । नहि धूमाधिकरणवृत्तित्वावच्छिन्ने विशेषाभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वं, धूमवति वह्नि र्नास्ती त्यप्रत्ययात् ; अपितु याव द्विशेषाभावाधिकरण ह्रदादिवृत्तित्वावच्छिन्न एवेति ।

इद मापाततः, तथाविधा भावीय यत्किंचि देकधर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्या नतिरिक्तवृत्तित्वरूपावच्छेदकताविवक्षापक्षेपि धूमत्वादेरवच्छेदकत्वस्य सामान्याभावानतिरिक्तत्वमतशक्योपपादनत्वात् । हेत्वधिकरणवृत्तित्वावच्छिन्ने यद्धर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगिता सामान्यानतिरिक्तवृत्तित्वाविवक्षया अव्याप्तेरपि शक्यवारणत्वात । वह्नित्वस्य वह्निघट उभयत्वावच्छिन्नाभावप्रतियोगिता नातिरिक्त वृत्तित्वेपि तन्न्यूनवृत्तित्वयाऽन्न्यूनानतिरिक्तवृत्तित्व विवक्षया तादृशप्रतियोगिता मादाय-

वतिप्रसंगात् । एतेनान्यूनवृत्तित्व विशेषितमपि परास्तम् । अतएव नानाप्रतियोगिवृत्त्येक प्रतियोगितांगीकारेऽपि न निस्तारः । लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः, तादृशतदवच्छिन्नत्वाप्रसिद्धे

दूषणस्योद्धार स्सम्भवतीति तार्णातार्णदहनोभयत्वावच्छिन्नाभावप्रतियोगित्वानुसरणम् । "अतिप्रसंगात्"-धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व प्रसंगात । तार्णातार्णदहनोभयत्वावच्छिन्नाभावा नुसरणं प्रयोजनं स्वयमेव स्फुटयति (एतेनेति) तार्णातार्ण दहनोभयाभाव प्रतियोगितामादाया तिप्रसंगतादवस्थ्येनेत्यर्थः । "अन्यूनवृत्तित्वविशेषितं"- अनतिरिक्त वृत्तित्व मपि । "अतएव"- दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसंगादेव(नाना प्रतियोगि वृत्त्येकप्रतियोगिता ङ्गीकारेपीति) तथासति यत्किंचिदेकाभाव प्रतियोगितासामान्यपर्यन्ता निवेशेपि धूमत्वादे धूमादिसामान्याभाव प्रतियोगितावच्छेदकत्वो पपादनसम्भवादिति भावः । उभयत्वादिरूप व्यासज्यवृत्ति धर्मावच्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीते रव्यासज्य वृत्तितया स्वपर्याप्त्यधिकरण पर्याप्तत्वं प्रतियोगितायां निवेश्यापि वह्नित्वादावतिप्रसंगवारणा सम्भव इति ध्येयम् । प्रतियोगिताधर्मिको भयाभावघटित व्याप्तिपक्षे मेयधूमवान् वह्नेरित्यादावतिव्याप्ति र्न सम्भवति, साध्यतावच्छेदक मेयधूमत्वादिरूप गुरुधर्मावच्छेद्यत्वस्य कुत्रापि प्रसिद्धिविरहेण तद्घटितोभयाभावा प्रसिद्धेरिति तन्मते मेयवह्निमान् धूमा दित्यादा वव्याप्ति माह (लघुरूपेति) (तादृश तदवच्छिन्नत्वाप्रसिद्धेरिति) तादृशसाध्यतावच्छेदकावच्छिन्नत्वस्या प्रसिद्धेरित्यर्थः । विषयितासम्बन्धस्य वृत्त्यनियामकत्वेना भावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभाव प्रतियोगितायां तत्प्रसिद्धिरित्यस्य वक्तु मशक्यत्वात् । अन्यथा मेयधूमवा न्वह्ने रित्यादौ अतिव्याप्तेरेव तादवस्थ्यादिति भावः ।

रिति चेन्न; प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात्।

(प्रतियोगितावच्छेदका नतिरिक्त वृत्तित्वस्येति) तथाच धूमादिसामान्याभाव प्रतियोगितायाः प्रतिधूमादिकं भिन्नत्वेपि तत्प्रतियोगितावच्छेदक धूमत्वादैरैक्येन स्वसमानाधिकरणा न्योन्याभाव प्रतियोगितानवच्छेदक तत्कत्वाद्यात्मक स्वव्यापक तत्कत्वरूप तदनतिरिक्तवृत्तित्वं धूमत्वादावक्षतमेवेति भावः।

नच प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभाव प्रतियोगितायाः विशेषाभावप्रतियोगितातो न भेदः, प्रतियोगिना मभेदात्; तथाच वह्निमान् धूमादित्यादौ अव्याप्तिर्दुर्वारा, धूमसमानाधिकरण विशेषाभाव प्रतियोगिता कूटे वह्नित्वादे रवच्छेदकत्वात्; तस्यच तदनतिरिक्तवृत्तित्वा दिति वाच्यम्। सामान्याभाव विशेषाभावयोः प्रतियोगित्वा भेदेपि सामान्याभावीय प्रतियोगिता त्वेनैव सामान्यधर्मा वच्छेद्यत्वात्, हेतु समानाधिकरणाभाव प्रतियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्व विवक्षणेना व्याप्तिनिरासात।

स्वव्यापक तत्कत्व मित्यत्र स्वस्य व्याप्यता साध्यता वच्छेदकताघटकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकताघटकसम्बन्धेनच बोद्धव्या; तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादे रव्यापकत्वेपि – समवायादिना वह्नित्वादिकं प्रति कालिकादिसम्बन्धेन घटत्वादे र्व्यापकत्वेपिच नक्षतिः। दण्डमान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक दण्डादौ दण्डान्तरसमानाधिकरण भेदप्रतियोगितावच्छेदकत्वेपि तत्तद्दण्डादिव्यक्तौ तत्तद्दण्डादिसमानाधिकरण भेदप्रतियोगितानवच्छेदकत्वस्या क्षततया सर्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्व मक्षतमेवेति नातिव्याप्तिः। दण्डाद्यवच्छिन्न

साध्यकत्वच्छेता वपीदृशरीत्या व्याप्तिरितितु नाशंकनीयम् , दण्डादौ साध्ये परंपरासम्बन्धेना खण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकतायाः स्वीकृतत्वात् ।

नन्वेवमपि हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक वह्निघटो भयत्वा नतिरिक्तवृत्तितया वह्नित्वादे रवच्छेदकत्वं दुर्वारमेव । नचोभयत्वादे रुभयादिपर्याप्ततया प्रत्येकं तदत्यन्ताभाव स्तदवच्छिन्नभेदश्च वर्तते , अय मेकोनद्वाविति सर्वजन साधारणानुभवस्य दुरपह्नत्वात् , तादृशप्रतीते रेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न कपिसंयोगी त्यादिप्रतीतेरपि मूलादौ कपिसंयोगाद्यवच्छेदकत्वा भावावगाहिता स्वीकारापत्तेः । यदिच तत्र बाधकाभावात वृक्षाद्यधिकरणक कपिसंयोगाद्यभावो विषय स्तदा प्रकृतेपि एकत्वाद्यवच्छिन्नाधिकरणक द्वित्वाभावादिविषयकत्वं दुर्वारमेव । एकत्वाद्यवच्छिन्ने द्वित्वादिमत्व प्रत्ययानुदयेन बाधकविरहस्यतुल्यत्वात् । प्रत्येक मुभयादौ द्वित्वाभावादिसत्वेपि द्वित्वादेः द्वित्वाभावानुयोगितानवच्छेदकतया द्वौ नद्वाविति प्रतीते र्दुरुपपादत्वात । द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्येष्टत्वात् । नञ्पदेनान्वयितावच्छेदकावच्छेदेन अभावबोधनात् , द्वित्वादिसामानाधिकरण्यमात्रावगाहिन्या अभावप्रतीतेः द्वौ न द्वावित्याकारताविरहात । तदाकारकप्रतीते रेवच अनुभवविरुद्धत्वात् । तथाच द्वित्वाद्यनतिरिक्तवृत्तिता कथं वह्नित्वादेरिति वाच्यम् । एवंसति वह्निघटोभयवान् धूमादित्यादौ साध्यतावच्छेदक द्वित्वादे रवच्छेदकतायाः दुरुपपादत्वात , प्रतियोगितावच्छेदकपदेन तादृशद्वित्वादिक मुपादायैव तस्यावच्छेदकानतिरिक्त वृत्तित्वस्य सम्पाद्यत्वात् , तस्यचोक्तरीत्या ऽसम्भवादिति स्वव्यापकतत्कत्वरूप तदनतिरिक्तवृत्तित्वघटक व्यापकतायां प्रतियोगिताऽवधिकरण त्वस्य भेदे निवेशनीयतया उभयत्वादावपि वह्नित्वनिरूपित तादृ-

स्वसमानवृत्तिकंचावच्छेदकं ग्राह्यं ।

शव्यापकताया अक्षतत्वेन तदवच्छेदकताप्रसंगस्य दुर्वारत्वात । नहि प्रत्येकवृत्तिरुभयत्वाद्यवच्छिन्न भेदः प्रतियोगिताव्यधिकरणः । उभयत्वादेः व्यासज्यवृत्तित्वेपि तदवच्छिन्नप्रतियोगितायाः अव्यासज्य वृत्तितया प्रत्येकमुभयत्वा द्यनधिकरणतावत्तदवच्छिन्न भेदप्रतियोगितानधिकरणत्वस्यासम्भवा दित्याशंक्य प्रतियोगितावच्छेदका नातिरिक्त वृत्तित्वघटकं अवच्छेदकं स्वसमानवृत्तिकत्वेन विशेषयति (स्वेति) तथाच वह्निघटोभयत्वादेः वह्नित्वादि समानवृत्तिकताविरहात् वह्नित्वादे स्तदनतिरिक्तवृत्तित्वेपि न पारिभाषिका वच्छेदकतापत्तिरिति भावः।

अत्र व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेद॰कावच्छिन्नाधिकरणताकत्व रूपस्याभाव विशेषणत्वोपगमेतु द्वित्वाद्यधिकरणस्य प्रत्येकं द्वित्वावच्छिन्नभेदाद्यधिकरणत्वेपि द्वित्वादेः द्वित्वादिव्यापकत्वं भेदे प्रतियोगितावैय्यधिकरण्य मनिवेश्यैवोपपादयितुं शक्यत इति स्वसमानवृत्तिकत्व निवेशनमयुक्तम् । नचाव्याप्यवृत्तिधर्मावच्छिन्न प्रतियोगिताकभेदस्या व्याप्यवृत्तिता मते संयोगेन दण्डादेर्यत्र साध्यतावच्छेदकता तत्र व्यभिचारिणि हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक दण्डादिक मादाय दण्डादिरूप साध्यतावच्छेदके पारिभाषिकावच्छेदकत्वं व्यापकताशरीरे प्रतियोगिता वैयधिकरण्याप्रवेशे नस्यात इति वाच्यम् । अव्याप्यवृत्ति दण्डादिक मादाय दण्डादेः पारिभाषिकावच्छेदकत्वा सम्भवेपि व्यभिचारनिरूपकाधिकरण यत्किंचिद्व्यत्तयवृत्तित्वरूप हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक मुपादाय दण्डादेः साध्यतावच्छेदकस्य तथात्वो पपादन सम्भवात । तदवृत्तौ साध्ये तदवृत्तित्वावच्छिन्न भेदस्य कथ मप्यसम्भवादितितु चिन्तनीयम् ।

तत्त्वंच स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वं, यावत्त्वादिकन्तु न तथा ।
पर्याप्तिश्चायमेको घट इमौ द्वा–

ननु किमिदं समानवृत्तिकत्वं? यद्यन्यूनानतिरिक्त वृत्तित्वं, तदा अनतिरिक्तवृत्तित्वान्तर निवेशवैफल्यं, स्वान्यूनवृत्ति यत् तदनतिरिक्तवृत्तित्वस्य स्वस्मि न्नियतत्वात् । तार्णातार्णदहनोभयत्वादिक मादाय दहनत्वादे रवच्छेदकत्वापत्तेश्च दुर्वारता । यदि चैकजातीयवृत्तित्वमेव तत्, तच्च स्वनिष्ठव्यासज्यवृत्तित्वा व्यासज्यवृत्तित्वान्यतररूपवत्त्वं, द्वित्वादौच वह्नित्वादे र्नैतादृशसमानवृत्तिकत्वं, वह्नित्वादे रव्यासज्यवृत्तित्वा दित्युच्यते । तथापि वह्निधूमोभयवान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक वह्निधूमघट त्रित्वाद्यनतिरिक्तवृत्तितया साध्यतावच्छेदक द्वित्वादेः पारिभाषिकावच्छेदकतापत्ति र्दुर्वारैव, द्वित्वत्रित्वाद्यो रुभयोरेव व्यासज्य वृत्तितया निरुक्तसमानवृत्तिकताया दुरपवादत्वात् इत्यत आह । (तत्त्वंचेति) स्वसमानवृत्तिकत्वंचेत्यर्थः । वह्निनिष्ठ यावत्त्व तार्णातार्णदहनोभयत्वादिक मादाय वह्नित्वादा वतिप्रसंगाभावं स्फुटयति (यावत्त्वादिक मिति) आदिना दर्शितद्वित्वादि परिग्रहः । 'नतथा'- नस्वपर्याप्त्यधिकरणपर्याप्तत्वरूप वह्नित्वादिनिरूपित समानवृत्तिकत्ववत । वह्नित्वादेः प्रत्येकवह्न्यादौ पर्याप्तत्वात् तस्यचा तथात्वादिति शेषः । तथाच यावत्त्वादे र्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपि वह्नित्वाद्य न्यूनानतिरिक्तवृत्तित्वेपिच नक्षतिरिति भावः । ननु पर्याप्ति राश्रयत्वमेव, वह्नित्वादिसमानाधिकरण यावत्त्वादेः वह्नित्वादिपर्याप्त्यधिकरण पर्याप्तत्व मक्षतमे वेत्यत आह (पर्याप्तिश्चेति) "अय मेको घट" इत्यनेना व्यासज्य वृत्तिघटत्व वह्नित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितम् । "इमौ द्वावि" ति प्रतीतिकथनेन व्यासज्य वृत्तिद्वित्वादीनां न प्रत्येकपर्याप्तिः, तथासति अय मेको द्वाविति प्रतीत्यापत्ते रिति दर्शितम् ।

यद्यपि समुदाय पर्याप्तत्वेपि तदेकदेश प्रत्येकपर्याप्तत्वं अनपवादं, समुदायस्य एकदेशानतिरिक्तत्वात्, इति यावत्त्वादे वह्नित्वादिपर्याप्त्य धिकरणप्रत्येकवह्निपर्याप्तत्वं दुर्वारम् । तथापि स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्व मत्र विवक्षितमिति नदोषः । व्यासज्याव्यासज्य वृत्त्योः समानजातीयवृत्तिक धर्मावच्छिन्नं पर्याप्तयो रेकधर्मिणि पर्याप्तिसत्वे प्येकधर्मावच्छिन्ने अपर्याप्तेः । अन्यथा - अयमेको वह्निरितिवत् अयमेको यावानिति प्रतीत्यापत्ते र्दुर्वारत्वात् ।

अथ-घटावित्यादौ यदि घटत्वादिसामानाधिकरण्यमात्रेण द्वित्वादिप र्याप्ति र्भासते तदा आकाशावित्याकारक प्रतीतेरपि प्रमात्वापत्तिः, आकाशत्वादि सामानाधिकरण्येनात्माकाशोभयत्वादेः पर्याप्तत्वात्, अतस्तत्र धर्मितावच्छेदक घटत्वाद्यवच्छिन्न पर्याप्तेरेव विषयत्व मंगीकार्यम् । तथाचाव्यासज्यवृत्तेरपि द्वित्वावच्छेदकत्व मायातमिति व्यासज्यवृत्ते रव्यासज्यवृत्ति समानवृत्तिकत्वं दुर्वारमेव । नचानेकवृत्ते रव्यासज्यवृत्तेरपि व्यासज्यवृत्ति धर्मपर्याप्त्यवच्छेदकत्व मास्तां, तादृशधर्मस्यच नाव्यासज्यवृत्ति पर्याप्त्यवच्छेदकत्वं, किन्त्वेकैकमात्र वृत्तेरेवेति न व्यासज्याव्यासज्यवृत्त्यो रेकधर्मावच्छिन्न पर्याप्तत्व प्रसंग इति वाच्यम् । घटो द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादिपर्याप्त्यवगाहनात् । एकमात्रवृत्तेरेवा व्यासज्यवृत्ति पर्याप्त्यवच्छेदकत्व मित्युक्त्यसम्भवात् । तत्र घटत्वादिसामानाधिकरण्य मात्रेण-द्रव्यत्वादिपर्याप्ति र्भासते, नतु तदवच्छेदेनेत्युक्तौ अय मेको घट इत्यादावपि इदन्त्वादौ घटत्वादिपर्याप्त्यवच्छेदकताभाने विवाद-संभवेनाव्यासज्यवृत्तिधर्मपर्याप्ते रवच्छिन्नत्वस्यैवा प्रसिद्धिप्रसंगात, धूमत्वादि पर्याप्त्यवच्छेदकाप्रसिद्ध्या तत्रावच्छेदकलक्षणाव्याप्तिप्रसंगात । नच स्वपर्याप्त्यवच्छेदकताव्यापक पर्याप्त्यवच्छेदकताकत्वमेव विवक्षणीयम्, अव्यासज्यवृत्तिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मे व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताविरहात न तस्या व्यासज्यवृत्तिपर्या-

स्यवच्छेदकताव्यापकत्व मिति व्यासज्याव्यासज्यवृत्त्यो र्नसमानवृत्तिकताप्रसंग इति वाच्यम् । एवं सति अनतिरिक्तवृत्तित्वनिवेश वैफल्यापत्तेः । न्यूनवृत्तिमहानसीय वह्नित्वादिपर्याप्त्यवच्छेदकतायाः वह्नित्वादिपर्याप्त्यवच्छेदकता व्यापकताविरहेणैव तादृशधर्म मुपादाय वह्नित्वादे रवच्छेदकतापत्त्यसंभवात इतिचेन्न;– अनेकवृत्तिघटत्वादेर्हि-तत्तद्घटत्वादिरूपैकैकमात्रवृत्तिधर्मावच्छिन्न पर्याप्तिकूटस्य घटनिष्ठपर्याप्तित्वादिरूपानुगत रूपावच्छिन्नस्या वच्छेदकत्व मेवोपपद्यते, नतु घटत्वावच्छिन्नं द्रव्यत्वादे र्यावद्घटादिषु पर्याप्त्यन्तरं, मानाभावात् । एकमात्रवृत्तिधर्मावच्छिन्नायाः पर्याप्ते रवच्छेदकत्वस्यैव विवक्षणीयतया अनुगतरूपावच्छिन्न पर्याप्तिकूटावच्छेदकानेकवृत्तिधर्मावच्छिन्न पर्याप्ति मादाय व्यासज्यवृत्ते र्नाव्यासज्यवृत्तिसमानवृत्तिकतापत्तिरिति ।

नच कालाकाशावित्यादिप्रतीत्या एकमात्रवृत्तिकालत्वाकाशत्वादेरपि द्वित्वादिपर्याप्त्यवच्छेदकत्वावगाहनात एकमात्रवृत्तिधर्माणामपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकतया तस्या व्यासज्यवृत्तिधर्मसमानवृत्तिकत्वं दुर्वारमितिवाच्यम् । तादृशप्रतीत्या तथाविधधर्मद्वयादौ व्यासज्यवृत्तेरेव द्वित्वादिपर्याप्त्यवच्छेदकताया अवगाहनात् । प्रकृतेचा व्यासज्यवृत्त्यवच्छेदकताया एव निवेशेनानतिप्रसंगात ।

अत्राहुः– अव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यस्वरूपसम्बन्धान्तरेमानाभावः , समवायादिसम्बन्धेनैवोपपत्तेः । नच समवायस्यैक्येन पटादावपि घटत्वादिविशिष्ट बुद्धिप्रसंग इति प्रतिनियतप्रतियोगिक पर्याप्तिसम्बन्ध स्वीकारइतिवाच्यम् । प्रतिनियत प्रतियोगिकैकविधसम्बन्धेनैवोपपत्तेः द्विविधसम्बन्धासिद्धेः कथमप्यसम्भवात । एवं द्वित्वादेरपि पर्याप्तिसमवायादि रूपसम्बन्धद्वयकल्पनमयुक्तम्, अनेकवृत्तिधर्मावच्छिन्नैक विधसम्बन्धेनैव निर्वाहात्

नच अयमेको द्वित्वसम्बन्धीति प्रतीतेः एकमात्रवृत्ति धर्मावच्छेदेनापि द्वित्वादेः सम्बन्धान्तरस्वीकार आवश्यक इति वाच्यं,

त्रितिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषएव । त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः । घटकं चावच्छेदकत्वं स्वरूपसम्बन्धविशेषः ।

तादृशप्रतीतावपि एकत्वसामानाधिकरण्येन अनेकवृत्तिधर्मावच्छिन्न सम्बन्धस्यैव भानोपगमात् । द्वित्वादिप्रकारक तत्सम्बन्धसंसर्गक बुद्धावेव तत्सबन्धांशे धर्मितावच्छेदकावच्छिन्नत्व भाननियमात् । सम्बन्धप्रकारकोक्त बुद्धौ धर्मितावच्छेदक सामानाधिकरण्य मात्रावगाहिता सम्भवादिति । तथाच समवायातिरिक्तस्य संसर्गकोटा वनन्तर्भावे प्यतिप्रसंगवारण सम्भवः, स्वाधिकरणता वच्छेदका वच्छिन्नाधिकरणताकत्व रूपस्य स्वसमानवृत्तिकत्वस्य लक्षणे निवेशनीयत्वात् ।

व्यासज्याव्यासज्यवृत्तित्वा न्यतररूपेण सजतीयत्वरूप - समानवृत्तिकत्व मुपेक्ष्य स्वपर्याप्त्यधिकरण पर्याप्तत्वनि - वेशनस्य प्रयोजनं सूचयति (त्रित्वादिकमिति) " द्वित्वादिसमानवृत्ति- कं " - द्वित्वादिपर्याप्त्यधिकरण पर्याप्तवृत्तिकं । त्रयोद्वा वित्यादि प्रत्यय- विरहादिति भावः । "द्वित्वादिना" - वह्निधूमोभयत्वादिना । "नाव्याप्तिः"- न धूमादावव्याप्तिः । द्रव्ये द्रव्याणीत्यादि प्रतीत्याद्रव्यत्वाद्येकैक धर्म- स्य द्वित्वत्रित्वादिन्यूनाधिक वृत्तिसंख्यापर्याप्त्यवच्छेदकत्वेपि तादृश॰ धर्मस्य प्रत्येकतत्तत्पर्याप्त्यतिप्रसक्तत्वेना नुगमक यत्किंचिद्रूपाव- च्छिन्न पर्याप्तिकूटंप्रत्येवा वच्छेदकतया पूर्वविवक्षया सामंजस्यमि- ति ध्येयम् । आत्माश्रयशंकां निरस्यति (घटकंचेति) (स्वरूपसम्बन्ध विशेष) इति तादृशावच्छेदकताश्रयसमनियत लघुधर्मानतिरिक्त वृत्तित्व मादायैव कम्बुग्रीवादि मत्वादा ववच्छेदकत्वो पपा- दन सम्भवा दिति भावः । प्रतियोगिता धर्मिको भया - भावघटनापक्षे गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदका-

एवंच यद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्ति धर्मावच्छिन्नेति वक्तव्यं, तेनोक्ता व्याप्तिनिरासः ।

वच्छिन्नत्वाप्रसिद्धिनिबन्धना मव्याप्तिं परिहरति (एवमिति) (यद्धर्मान्यूनवृत्तीति) तदन्यूनवृत्तित्वं तत्समानाधिकरणभेद प्रतियोगितानवच्छेदकत्वं, तत्र पूर्वोक्तयुक्त्या भेदे प्रतियोगितावैय्यधिकरण्यनिवेशाद्वह्निघट उभयत्वादे र्वह्नित्वा द्यन्यूनवृत्तित्व मक्षतमेवेति यद्धर्मपर्याप्त्यधिकरणपर्याप्तत्वमपि निवेश्यम् । अतो धूमसमानाधिकरणाभाव प्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्वेपि नक्षतिः । प्रतियोगितायाः प्रतियोगिभेदेन भेदे धूमादिसामान्याभावप्रतियोगितायां प्रत्येकं धूमत्वाद्यन्यूनवृत्तिताविरहेणातिव्याप्तिः, नानाप्रतियोगिवृत्तिप्रतियोगिताया ऐक्ये वह्निघटोभयत्वाद्यवच्छिन्न प्रतियोगितायां प्रत्येकपर्याप्तायां वह्नित्वादिपर्याप्त्यधिकरण पर्याप्तत्वसहितवह्नित्वाद्यन्यूनवृत्तित्व सत्वा दव्याप्तिः, अतः तदन्यूनवृत्तित्वमात्र मुपेक्ष्यान्यूनवृत्तिधर्मावच्छिन्नत्वपर्यन्तस्य उभयाभावप्रतियोगितायां निवेशः ।

अथात्र दण्डादिनानाव्यक्ति साध्यतावच्छेदकके व्यभिचारिविशेषे ऽतिव्याप्तिः, निखिलानामेव दण्डादिव्यक्तीनां दण्डादिरूपसाध्यतावच्छेदकसमानाधिकरणभेद प्रतियोगितावच्छेदकतया हेतुसमानाधिकरणदण्डाद्यवच्छिन्नाभाव प्रतियोगितायां तादृशभेदप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावसत्वात् । तादृशभेदप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपं तद्रूपविशिष्टावच्छेद्यत्वाभावनिवेशे दण्डादिमन्निष्ठभेदप्रतियोगितानवच्छेदकतानवच्छेदक दण्डत्वादिविशिष्टावच्छेद्यत्वस्य दण्डादि सामान्याभावप्रतियोगितायां सत्वेन तत्रातिव्याप्तिपरिहारेपि –धूमवान् वह्ने रित्यादावतिव्याप्तिः, धूमाद्यभावप्रतियोगितायां लाघवेन स्वरूपत एव धूमत्वादे रवच्छेदकतया विशेषणान्तरविशिष्ट धूमत्वाद्यवच्छेद्यत्वाभावसत्वात् । नच विशेषणान्तरविशिष्ट धूमत्वाद्यवच्छेद्यत्वाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम्, घटावृत्तिजातिमत्सामान्याभाव प्रतियोगितायामेव तत्प्रसिद्धेः । इति चेन्न; –

दण्डाद्यात्मकसाध्यतावच्छेदकस्य साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासम्भवेपि व्यभिचारनिरूपकाधिकरणं यत् तद्वृत्त्यन्यत्वस्याखण्डस्य तथात्वात, तदवच्छेद्यत्वाभावस्यापि हेतुसमानाधिकरणाभाव प्रतियोगितासामान्ये असत्वेन दण्डादिसाध्यके ऽनतिप्रसंगात ।

अथवा साध्यतावच्छेदकवन्निष्ठ भेदप्रतियोगितायां यादृशरूपावच्छिन्नत्वं नास्ति तादृशरूपावच्छिन्नत्वाभावस्य विवक्षणीयत्वात दण्डादिसाध्यके व्यभिचारिणि दण्डयादिनिष्ठप्रतियोगितायां तत्ताविशिष्टदण्डाद्यवच्छिन्नायां दण्डत्वादिविशिष्टावच्छेद्यत्वाभावसत्वात, दण्डयादि सामान्याभाव प्रतियोगितायां च तादृशाभावासत्वेना तिव्याप्त्यनवकाशात । अवच्छेदकतयो रेकसम्बन्धावच्छिन्नत्वं निवेश्य सम्बन्धभेदनिबन्धनो दोषो निरस्यः ।

सत्तावान् जाते रित्यादौ सत्तात्वादे र्हेतु समानाधिकरणाभाव प्रतियोगितावच्छेदक विशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितया अव्याप्तिरिति प्रतियोगितावच्छेदका व्यभिचारित्वरूपस्य स्वव्यापकतत्करत्वरूपस्यच तदनतिरिक्तवृत्तित्वस्य निवेशो नसम्भवतीति यद्धर्मविशिष्टस्य प्रतियोगितावच्छेदक यत्किञ्चिद्धर्मावच्छिन्ना व्यभिचारिता प्रतियोगितावच्छेदक यत्किंचिद्रूपावच्छिन्नस्यवा यद्रूपविशिष्टव्यापकता तत्स्वरूपं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयं। तावतैवच वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदक मादाय वह्नित्वादेः पारिभाषिकावच्छेदकत्व निरासः सम्भवति, वह्नित्वादिविशिष्टस्य तादृशोभयाद्यवच्छिन्न व्यभिचारित्वात , तादृशोभयत्वादे र्वह्नित्वादिविशिष्ट व्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्व विशेषणं विनैव निर्वाहः; एवं यद्रूपान्यूनवृत्ति धर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकस्य व्याप्तिघटकतापक्षेपि तदन्यूनवृत्तित्वं यदि व्यापकत्वं तदा सत्तात्वव्यापकविशिष्ट सत्तात्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभाव प्रतियोगितायां सत्वादुक्तस्थल एवाव्याप्ति

वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभावव दसम्बद्ध स्वविशिष्टसामान्य कत्वम् ,

---

रिति तद्विशिष्टव्यापकतावच्छेदकत्व रूपं तदन्यूनवृत्तित्व मेव निवेश्यम् , तावतैव वह्निघटोभयत्वादेः वह्नित्वादिविशिष्ट व्यापकता नवच्छेदकतया धूमादिसमानाधिकरणाभाव प्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्व सत्वे प्यव्याप्त्यनवकाशात – यद्धर्मान्यूनवृत्ति धर्मे यद्धर्मसमानवृत्तिकत्व विशेषण प्रक्षेपमन्तरेणैव सामञ्जस्य मित्याशयेनाह "वस्तुतस्त्वि" त्यादिना - (तदवच्छिन्नेति) तत्पदमनतिरिक्तवृत्तित्व प्रतियोगिभूत हेतुसमानाधिकरणाभाव प्रतियोता वच्छेदकत्व पर्याप्त्यधिकरणपरम् । स्वपदं अनतिरिक्तवृत्तित्वेनाभिमतपरम् । धूमत्वाद्यवच्छिन्नाभाववति मेयधूमत्वादिविशिष्टस्यासम्बद्धतया मेयधूमत्वादे रवच्छेदकत्वनिर्वाहः । धूमत्वाद्याश्रयमहानसीय धूमाद्यभाववति धूमत्वादिविशिष्टस्य सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या तद्धूमत्वादिरूपावच्छेदकभेदमादायातिव्याप्तिरिति तदाश्रय प्रतियोगित्वं परित्यज्य तदवच्छिन्न प्रतियोगिताकत्वमभावविशेषणमुपात्तम् । हेतुसमानाधिकरणाभाव प्रतियोगितायां यस्य येन सम्बन्धेनावच्छेदकता तेन सम्बन्धेनावच्छिन्नत्वं निवेशनीयम् , तेन विषयितया धूमत्वाद्यवच्छिन्नस्य ज्ञानादेरभाववति धूमत्वादिविशिष्ट धूमादेस्सम्बद्धत्वेपि न धूमत्वादेरवच्छेदकत्वानुपपत्तिः । उत्पत्तिकालावच्छेदेन धूमत्वाद्यवच्छिन्नाभाववति धूमत्वादिविशिष्टस्य संयोगरूपसाध्यतावच्छेदक सम्बन्धेन सम्बद्धतया तादृशं स्वंगुणत्वादि कर्मवति संयोगेन धूमादिसाध्यके व्यभिचारिण्यति प्रसंगस्य वारणाय प्रतियोगिवैयधिकरण्यमभावे विशेषणम् । धूमाद्यभावस्यापि ह्रदादौ प्रतियोगिव्यधिकरणतया तदभाववारणासम्भवात् , साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमद्वृत्तियोदस्तद्भिन्नत्वानिवेशे संयोगेनावृत्ते गुणादेरयाभावस्य तद्भिन्नस्य प्रसिद्धया तद्वति धूमत्वादिविशिष्टस्य संयो

गेन सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या पूर्ववद्गुणत्वादेरे वावच्छेदकत्वादतिव्याप्ति तादवस्थ्यम् , स्वपदेनानुयोगिभूताभावो पादाने संयोगेन साध्यतायां सद्धेतौ तादृशसम्बन्धेन गुणाद्यभाव प्रतियोगिनो अधिकरणाप्रसिद्ध्या तादृशाभावाप्रसिद्धे रव्याप्तिः , अतः प्रतियोगिवैयधिकरण्य विशिष्टाभावाधिकरणासम्बद्धत्वं विवक्षणीयम् । द्रव्यंगुणादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक पृथिव्यन्यत्व विशिष्टद्रव्यत्वत्वाद्यवच्छिन्नाभाव प्रतियोग्यनधिकरणगुणादौ द्रव्यत्वत्वादिविशिष्टस्या सम्बद्धतया द्रव्यत्वत्वादेरवच्छेदकत्वापत्तिरिति - प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्यमेव प्रवेश्यम् , तद्धर्मस्य तद्धर्मावच्छिन्नाभाव प्रतियोगितावच्छेदकत्वेनोपादानं शिरोवेष्टनेन नासिकास्पर्शमनुकरोतीति तद्धर्मावच्छिन्न वैयधिकरण्यविशिष्टत्वमेव निवेशनीयम् । तद्धर्मावच्छिन्नानधिकरणासम्बद्ध स्वविशिष्टसामान्यकत्वन्तु फलितार्थः । तद्धर्मावच्छिन्ना नधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन तदसंबन्धित्वम् , तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरण समवायसम्बन्धावच्छिन्नाभाव प्रति योगितावच्छेदकगुणादिविषयक ज्ञानत्वाद्यवच्छिन्नस्य विषयतया द्रव्यादि सम्बद्धस्य सम्बन्धसामान्येनाधिकरणे नित्यगुणादौ गुणत्वादि विशिष्टस्या समवेतत्वेपि न गुणत्वादेरवच्छेदकताप्रसंगः । एवंच महाकालो घटवान् , कालपरिमाणादित्यादौ उभयाभाव घटितप्रतियोगिवैयधिकरण्यशालि हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदक गगनत्वादि विशिष्टस्य साध्यतावच्छेदकसम्बन्धेन सम्बन्धिनोप्रसिद्ध्या अव्याप्ते वारणाय साध्यतावच्छेदक सम्बन्धसामान्ये तदवच्छिन्नप्रतियोगिकत्व यद्यदधिकरणानुयोगिकत्वोभयाभावस्तत्तदधिकरणासम्बद्ध स्वविशिष्टसामान्य कत्वं विवक्षणीयम् । ईदृशंच स्वं तत्र गगनत्वादिकमेव प्रसिद्धमितिनाव्याप्तिः । वदसम्बद्धत्वंच तदनुयोगिक साध्यतावच्छेदकसम्बन्धाप्रतियोगित्वं, तेन संयोगादिसंबधेन घटत्वाद्यवच्छिन्नाभाववतिज्ञानकपालादौ विषयित्व समवायादिना घटत्वादिविशिष्टस्य सम्बद्धत्वेपि

वह्निमान् धूमादित्यादौ नावच्छेदका प्रसिद्धिः । तादात्म्येन साध्यतायां साध्यतावच्छेदकसम्बन्धेन वृत्ते रप्रसिद्धया व्याप्ति स्स्यादि-त्यवृत्तित्व मुपेक्ष्या सम्बद्धत्वानुधावनम् । विशिष्टसत्तावान् जाते रित्यादौ हेतुसमाना धिकरणाभावप्रतियोगितावच्छेदका वच्छिन्नाभाववति गुणादौ विशिष्टसत्तात्वाद्याश्रयसत्तादेः सम्बद्धतया विशिष्टसत्तात्वादे रवच्छेदक त्वानुपपत्तिरिति स्वाश्रये असम्बन्धत्व मनिवेश्य स्वविशिष्टे तन्निवेशनम् ।

यद्यपि विशेष्यस्य तत्सम्बन्धित्वे विशिष्टे तदसम्बन्धित्वं दुर्घटम्, तथापि स्वविशिष्टप्रतियोगिकत्वाभावव त्तदवच्छिन्नाभावव दनुयोगिकसाध्यतावच्छेदकसम्बन्ध सामान्यकत्वस्य तदवच्छिन्नाभाव वदनुयोगिकसाध्यतावच्छेदक सम्बन्धप्रतियोगितावच्छेदकता पर्याप्त्यधिकरणापर्याप्त विषयतापर्याप्त्यधिकरणत्वस्यवा विवक्षणीयतया न दोषः । स्वविशिष्टप्रतियोगिकत्वानिच्च विशिष्योपादाय तदभावकूट मेव निवेशनीयं, तेन मेयधूमत्वादि विशिष्ट प्रतियोगिकत्व त्वाव-च्छिन्नाभावस्य गुरुधर्मस्या भावप्रतियोगिता नवच्छेदकता मते अप्रसिद्धावपि नक्षतिः ।

वस्तुतो मेयधूमत्वविशिष्ट प्रतियोगिकत्वाभावस्य शुद्धधूमत्वादि प्रकारक ज्ञाननिष्ठविषयितासम्बन्धसाधारणत्वा द्धूमत्वादिविशिष्ट-प्रतियोगिकत्वत्वस्य लघुधर्मस्य नतत्प्रतियोगितावच्छेदकत्व सम्भव इति नमेयधूमत्वादिविशिष्टप्रतियोगिताकत्वत्वा वच्छिन्नाभावाप्रसिद्धि रिति सामान्यत एकाभावनिवेशोपि सम्भवतीति ध्येयम् ।

येन रूपेण यस्य यद्धर्मिसम्बन्धिता तदन्यरूपावच्छिन्ने तत्र त-त्सम्बद्धत्वाभावसत्व मभ्युपेत्यवा एतल्लक्षणम् । द्वितीयलक्षणंच तदनभ्युपगमेन । धूमादिसमानाधिकरणाभाव प्रतियोगितावच्छेदक महानसीयवह्नित्वावच्छिन्नाद्यभाववति वह्नित्वादिविशिष्ट महानसी-यवह्न्यादे रसम्बद्धतया वह्नित्वादा वतिप्रसंगवारणाय सामान्यपदम् ।

अथ – साध्यतावच्छेदक संयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति कालिकादिसम्बन्धेन घटत्वादिविशिष्टस्य पटादेः संयोगादिसम्बन्धेन सम्बद्धत्वा दवच्छेदकाप्रसिद्धिः । साध्यतावच्छेदकताघटकसम्बन्धेन स्ववैशिष्ट्यनिवेशेपि कालिकसम्बन्धेन घटत्वादिविशिष्टस्य कालिकसम्बन्धेन साध्यतायां महाकालपरिमाणादि हेतुके अवच्छेदकाप्रसिद्धि र्दुर्वारैव । गगनत्वाद्यवच्छिन्नाभाववति काले कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य स्पन्दादेः कालिकसम्बन्धेन सम्बद्धत्वात् । प्रतियोगितावच्छेदकता वच्छेदकसम्बन्धेन वैशिष्ट्यनिवेशे घटत्वादि समनियता समवेतगुरुधर्मस्य यत्र साध्यतावच्छेदकता तत्र तादृशधर्मस्य घटत्वादिक मादाय ऽवच्छेदकत्वा नुपपत्तिः, घटत्वादे स्समवायेन घटाद्यभाव प्रतियोगितावच्छेदकत्वा त्तत्सम्बन्धेन च तद्धर्मविशिष्टा प्रसिद्धेरिति चेन्न ;– यत्किंचि त्सम्बन्धेन स्वविशिष्टसामान्ये असम्बद्धत्व निवेशनेन सामञ्जस्यात् ।

नचैवं-वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक घटत्वाद्यवच्छिन्नाभाववति विषयितासंबन्धेन वन्हित्वविशिष्टस्य साध्यतावच्छेदकसंयोगेना सम्बद्धत्वात वह्नित्वादेः, गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक सविषयकत्वाद्यवच्छिन्नाभाववति घटादौ विषयितया गुणत्वादिविशिष्टस्या समवेतत्वात् गुणत्वादे रवच्छेदकत्वापत्त्या अव्याप्तिरिति वाच्यम् । सध्यतावच्छेदके तादृशपारिभाषिकावच्छेदकता शून्यत्वमनिवेश्य साध्यतावच्छेदकता घटकसम्बन्धेन साध्यतावच्छेदकावच्छिन्न निरूपिताधिकरणत्वांशे साध्यसामानाधिकरण्य घटके पारिभाषिकावच्छेदकता घटकसम्बन्धेन तादृशावच्छेदकावच्छिन्ना निरूपितत्वस्य निवेशनीयतया विषयितया वह्नित्वादे रवच्छेदकत्वेपि समवायरूप साध्यतावच्छेदक

ताघटक सम्बन्धेन वह्नित्वाद्यवच्छिन्न निरूपिताया मधिकरणतायां विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्न निरूपितत्वाभावसत्वेन लक्षणसमन्वयात् । गुरुधर्मस्यापि प्रतीतिबलेना धिकरणता निरूपकतावच्छेदकत्वोपगमा न्न गुरुधर्मावच्छिन्न साध्यकस्थले साध्यतावच्छेदकावच्छिन्नाप्रसिद्धिः ।

अथवा – अवच्छेदकता घटकसंबन्धेनावच्छेदक विशिष्टावृत्ति विषयिताकत्वं साध्यतावच्छेदकता वच्छेदकसम्बन्धेन साध्यतावच्छेदक विशिष्टविशेषण मंगीकार्यम् । समवायसम्बन्धेन वह्नित्वादि विशिष्टस्य या विषयता तस्या स्सम्बन्धान्तरेण वह्नित्वादि विशिष्टनिष्ठविषतान्यतया नाव्याप्त्यवकाशः । स्वरूपसम्बन्ध रूपावच्छेदकता प्रवेशमतेपि ईदृशरीतिरेवा दरणीया , अन्यथा – वह्नित्वादिधर्मिकानवच्छेदकत्वादि ग्रहस्य वह्नित्वाद्यवच्छिन्न विधेयकानुमिति हेतुत्वे धर्मितावच्छेदकतया वह्नित्वत्वादिविषयताया हेतुतावच्छेदककोटौ निवेशा द्गौरवस्य वह्नित्वत्वाद्यनुपस्थितिदशायां वह्निमानित्याकारकानुमित्यनुपपत्तेश्च दुर्वारत्वात् ।

अत्रच – यत्किञ्चिद्धेत्वधिकरणासम्बद्ध स्वविशिष्टसामान्यकत्वस्य लघो रवच्छेदकान्तार्थत्व सम्भवे हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक यत्किञ्चिद्धर्मावच्छिन्नाभावव दसम्बद्ध स्वविशिष्टसामान्यकत्वस्य गुरुतरस्य निवेशनं मूलोपात्तप्रतियोगितान्तस्य यथाश्रुतार्थकत्वानुरोधेन । अन्यथा ऽवच्छेद कान्तसमुदायस्य पारिभाषिकैकपदतापत्तेः । यथा निरुक्तावच्छेदकतानिवेशे अवच्छेदकपदस्यैवा वच्छेदकावच्छिन्नाभाववदसम्बद्ध स्वविशिष्टसामान्यकत्वे पारिभाषिकत्वं तद्वत् ।

अत्र – जातिमान् मेयत्वादित्यादौ जातित्वादे रवच्छेदकत्वानुपपत्तिः , हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदकीभूत-

स्वविशिष्टसम्बन्धि निष्ठाभावप्रतियोगिता नवच्छेदकतत्कत्वंवा तदनतिरिक्तवृत्तित्वं वक्तव्यम् ।

यद्धर्मावच्छिन्नाभाववति साध्यतावच्छेदक समवाय सम्बन्धेन सम्बद्धत्वप्रसिद्धिः तद्धर्मावच्छिन्नाभाववति जातित्वादिविशिष्टस्यापि समवेतत्वात, जातित्वाद्यवच्छिन्नाभाववति च समवेतत्वस्यैवाप्रसिद्धया तदभाववदसमवेतत्वस्य जातित्वादिविशिष्टादौ दुर्निरूपत्वात् । एवं यथाश्रुते विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वादेरपि अवच्छेदकत्वानुपपत्तिरतोन्यथानतिरिक्तवृत्तित्वं निर्वक्ति-(स्वविशिष्टेति) हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक शुद्धधूमत्वादे र्मेय धूमत्वादिविशिष्टसंबन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकतया मेयधूमत्वादे रवच्छेदकत्वोपपत्तिः । जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभाव प्रतियोगितावच्छेदक जातित्वादेः जातित्वविशिष्टसमवायिनिष्ठाभाव प्रतियोगितानवच्छेदकतया तस्य तथात्वोपपत्तिः । विशिष्टसत्तावान् जातेरित्यादौ द्रव्यत्वत्वविशिष्टसत्तात्वादेः विशिष्टसत्तात्वाश्रय सम्बन्धिगुणादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वेपि विशिष्टसत्तात्वादि विशिष्टसम्बन्धिद्रव्यादि निष्ठाभावप्रतियोगितानवच्छेदकत्वात विशिष्टसत्तात्वादे रवच्छेदकतानिर्वाहः । सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेन बोद्धव्यं, तेन घटत्वादे विषयितादिसम्बन्धेन घटत्वादिविशिष्टसम्बन्धिज्ञानादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वेपि नावच्छेदकाप्रसिद्धिः ।

अथैवं – महाकालो घटवान् कालपरिमाणादित्यादौ अवच्छेदकाप्रसिद्धिः, साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽप्रसिद्धया स्वपदेन गगनत्वाद्युपादानासम्भवात् ।

नच – सम्बन्धसामान्येन स्वविशिष्टसम्बन्धिनिष्ठः - सम्बन्ध सामान्येन प्रतियोगिव्यधिकरणाभावोनिवेश्यः, विषयितया गगनत्वा

दिविशिष्टसम्बन्धिनि तद्विषयकज्ञानादौ सम्बन्धसामान्येन प्रतियोगिव्यधिकरणस्य तादृशज्ञानासमानकालिक तत्तद्घटाभावादेः प्रतियोगितायां गगनत्वादे रनवच्छेदकत्वा दुक्तस्थले गगनत्वादिक मवच्छेदकं प्रसिद्ध्यति, तादृशज्ञानादौ कालिकसम्बन्धेन गगनादे रभावसत्त्वेपि तस्य विषयितासम्बन्धेनैव प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् । वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक ज्ञानत्वादेः वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकतया वह्नित्वादे रवच्छेदकत्वापातात । ज्ञानत्वाद्यवच्छिन्नाभावस्य विषयतासम्वन्धेन प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वात ।

नच तादात्म्यसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठ भेदप्रतियोगितानवच्छेदकत्वं विवक्षणीयम् , कालो घटवान् कालपरिमाणा दित्यादौ गगनत्वादौ गगनत्वादि विशिष्टाभिन्ननिष्ठ भेदप्रतियोगितानवच्छेदकत्वात् गगनत्वादिक मवच्छेदकमिति वाच्यम् । सत्तावान् जाते रित्यादौ तादात्म्येन सत्तात्वादिविशिष्टसम्बन्धिनि सत्तादौ यो भेदः तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वादौ सत्वेन सत्तात्वादे रवच्छेदकत्वापातात । तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य निवेशेपि घटत्वाभाववान् घटान्यत्वा दित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकघटत्वाभावान्य वृत्तित्वविशिष्ट घटत्वाभावत्वादे रन्यतरसम्बन्धेन घटत्वाभावत्वादिविशिष्ट सम्बन्धिनिष्ठस्या न्यतरसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वा दव्याप्त्यापत्तेः । घटत्वाभावत्वादिविशिष्ट सम्बन्धिनि पटादौ घटत्वाभावान्य वृत्तित्वविशिष्ट घटत्वाभावत्वाद्यवच्छिन्नस्य साध्यतावच्छेदकसम्ब-

न्धेन सत्त्वात्, घटत्वाभावेच तदवच्छिन्नस्य तादात्म्यसम्बन्धेन सत्त्वात्; तन्निष्ठतद्भावस्यान्यतरसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात् ।

एतेन - यत्किंचित्सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठो य स्तेन सम्बन्धेन प्रतियोगिव्यधिकरणो ऽभाव स्तत्प्रतियोगितानवच्छेदकत्वविवक्षापि निरस्ता, तादात्म्येन सत्तात्वाद्यवच्छिन्नं प्रति तत्सम्बन्धेन विशिष्टसत्तात्वाद्यवच्छिन्नस्य व्यापकतया उक्तस्थले सत्तात्वादेरवच्छेदकताया दुर्वारत्वात् । कालिकसम्बन्धेन वह्नित्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वाद्यवच्छिन्नस्य व्यापकतया वह्निमान् धूमादित्यादौ वह्नित्वादे रवच्छेदकत्वापाताच्च ।

नच येन येनसम्बन्धेन योयस्स्वविशिष्टसम्बन्धी तेन तेन सम्बन्धेन प्रतियोगिव्यधिकरणोय स्तन्निष्ठोभाव स्तत्प्रतियोगितानवच्छेदकत्वं विवक्षणीयं, संयोगसमवायादिना वह्नित्वसत्तात्वा द्यवच्छिन्नंप्रति तेनसम्बन्धेन घटत्वविशिष्टसत्तात्वा द्यवच्छिन्नस्या व्यापकतयाच नोक्तदोषावकाशइति वाच्यम्, एवं सति विषयितासम्बन्धेन कम्बुग्रीवादिमत्वादि विशिष्टसम्बन्धिनि तेन रूपेण घटाद्यवगाहिनि घटत्वाद्यप्रकारकज्ञानादौ विषयितया घटत्वादिविशिष्टस्यासत्त्वेन घटत्वादेः तेनसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न व्यधिकरणाभाव प्रतियोगितावच्छेदकतया घटत्वादिकमादाय कम्बुग्रीवादिमत्वादेः अवच्छेदकत्वनिर्वाहासम्भवात् ।

नच हेतुसमानाधिकरणाभावीय यत्किञ्चित्प्रतियोगितायां यदवच्छेदकं तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वं तस्य वाच्यम्, घटवान् कालपरिमाणादित्यादौ तादात्म्यं विषयिताञ्च तादृशसम्बन्धमादाय गगनत्वादे रवच्छेदकत्वं संगमनीयं, विशिष्टसत्तात्वादे र्गुणादिनिष्ठभेदप्र-

त्तियोगितायां गौरवेण नावच्छेदकत्वं – अपितु शुद्धसत्तात्वादे रेवेति-हेतुसमानाधिकरण तादृशभेदस्य साध्यतावच्छेदकसम्बन्धेन प्रतियो-गिसमानाधिकरणत्वेन तदुपादानासम्भवात – सत्तावान् जातेरित्यादौ यत्सम्बधेत्यनेन तादात्म्यसम्बन्धमुपादायसत्तात्वादे र्नावच्छेदकताप्रसंगः, वह्निमान्धूमादित्यादौ संयोगरूप साध्यतावच्छेदकसम्बन्ध धर्मिकोभया-भाव घटितप्रतियोगिवैयधिकरण्यशालिनः उत्पत्तिकालावच्छेदेन धूमा-धिकरणवृत्तेः समवायसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकं रूपत्वादिकं – वह्नित्वादिविशिष्टसमवायिनिष्ठस्य समवायेन प्रतियोगि-व्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं – अतोवह्नित्वादे रवच्छेद-कत्वापत्तिरिति प्रतियोगितावच्छेदकसम्बन्धं परित्यज्य साध्यतावच्छे-दकसम्बन्धः प्रतियोगिवैयधिकरण्यशरीरे निवेशितः, तथाच सति संयोगसम्बन्ध धर्मिकोभयाभाव घटितप्रतियोगि वैयधिकरण्यशालिनो रूपत्वाद्यवच्छिन्नाभावस्य वह्नित्वादिविशिष्टसम्बन्धिनि सत्वान्नायं दोष इति वाच्यम्। वह्निद्व्यणुकत्वादे र्यत्र संयोगेन साध्यतायामवच्छेद-कता तत्र तदवच्छिन्न समवायितेजः परमाणौ समवायसम्बन्धावच्छि न्नरूपत्वाद्यवच्छिन्नाभावासत्वेन तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानव-च्छेदकत्वस्य कालविशेषावच्छेदेन हेतुसमानाधिकरणाभाव प्रतियोगि-तावच्छेदकरूपत्वादौ सत्वेन साध्यतावच्छेदकस्यावच्छेदकताप्रसंगात् ।

यत्तु स्वविशिष्टप्रतियोगिकत्व तदवच्छिन्नाभावव दनुयोगि-कत्वोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य विवक्षणीय-तयानकश्चिद्दोषः, जातिमान् मेयत्वादित्यादौ जातित्वाद्यवच्छिन्नाभावव त्समवेतत्वाप्रसिद्धावपि जातित्वादि विशिष्टप्रतियोगिकत्व तादृशाभावव दनुयोगिकत्वोभयाभावस्य समवायसामान्येसत्वेन जातित्वादे रवच्छे-दकत्वोपपत्तेः, कालोघटवान् कालपरिमाणादित्यादौ कालिकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्ध्य प्रसिद्धावपि तादृशसम्बन्धसामान्ये गगन-त्वादिविशिष्टप्रतियोगिकत्व तदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाव-

सत्त्वेन गगनत्वादे रवच्छेदकता निर्वाहादिति । तन्न, तावता प्रथमलक्षणस्यैव परिष्कारेण द्वितीयलक्षणानुसरणानुपपत्तेः ।

अत्रवदन्तिं- साध्यतावच्छेदकसम्बन्धेन यदवच्छेदकविशिष्टसम्बन्धिनो प्रसिद्धिर्यत्र तदवच्छिन्नाभाववदसम्बन्ध स्वविशिष्टसामान्यकत्वमेव तत्र तदवच्छेदकत्वं, तेन घटवान् कालपरिमाणादित्यादौ गगनत्वादावच्छेदकत्वप्रसिद्धिः, यदवच्छेदकविशिष्टे तदवच्छिन्नाभाववति साध्यतावच्छेदक सम्बन्धेन सम्बद्धत्वाप्रसिद्ध्या तदभावोदुर्निरूपः तत्रावच्छेदकत्वं स्वविशिष्टेत्यादिरूपं, तेन जातिमान्मेयत्वादित्यादौ जातित्वादे रवच्छेदकत्वोपपत्तिः, सर्वसाधारणस्य एकविधावच्छेदकत्वस्य दुर्वचत्वेपिनक्षतिः, वाकारो व्यवस्थित विकल्पार्थकइति ।

अत्रेदं चिन्त्यते - ईदृशावच्छेदकत्वयो रभावद्वयविषयकं ज्ञान मनुमिति हेतुः, प्रत्येकाभावज्ञानस्यवा वैकल्पिकी कारणता? आद्ये कालो घटवान् कालपरिमाणा दित्यादौ भ्रमं विना अनुमित्यनुपपत्तिः, द्वितीयस्या वच्छेदकत्वस्या सिद्धेः । द्वितीये जातिमान् मेयत्वा दित्यादौ प्रथमनिरुक्तावच्छेदकत्वाभावस्य जातित्वे ऽबाधितत्वात तज्ज्ञाना द्भ्रमं विनैवानुमित्यापत्तिः ।

नच साध्यसाधनभेदेन कार्यकारणभेदस्या वश्यकत्वात कालिकसम्बन्धेन घटादिसाध्यक कालपरिमाणादिहेतुकानुमितौ प्रथम निरुक्तावच्छेदकत्वाभावज्ञानस्यैव - मेयत्वादिलिंगकजात्याद्यनुमितौच चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुतास्वीकारा न्नोक्तदोषद्वयावकाश इति वाच्यम् । साध्यसाधनभेदेना नुमितिव्याप्तिज्ञानयोः कार्यकारणभावभेदेपि एकसाध्यसाधनस्थले यादृशज्ञाना दनुमिति स्तादृशज्ञानसत्त्वे ऽन्यत्रानुमित्यनुत्पादस्या नुभवविरुद्धतया प्रथम निरुक्तावच्छेदकत्वाभावज्ञानात कालो घटवान् कालपरिमाणा दित्यत्रानुमितिस्वीकारे तादृशज्ञाना न्मेयत्वादिलिंगकजात्याद्यनुमिते रवश्यं

स्वीकरणीयतापातात । अन्यथा सद्धेतुकानुमिता वतिव्याप्तिवारणायोपात्त प्रतियोगितावच्छेदकावच्छिन्नत्वाद्यंशाविषयक ज्ञानस्यैव लाघवेन हेतुतापत्तिः । मेयत्वादिलिंगक जात्याद्यनुमितौ चरमनिरुक्तावच्छेदकत्वाभाव ज्ञानस्यैव हेतुत्वे समवेतमात्रमेव सकलहेतुमति समवेतमिति भ्रमदशायां अनुमित्युपपादनासम्भवश्च, तदानीं समवेत वृत्तितया गृहीतघटत्वादिविशिष्ट व्यापकतावच्छेदके हेतुव्यापकतावच्छेदकत्वग्रहा दसमवेतवृत्तितया गृहीतगगनत्वादिविशिष्टस्य समवायेन सम्बन्धिताया दुर्ग्रहत्वात् स्वविशिष्टेत्यादिरूपावच्छेदकत्वस्य क्वचिदपि गृहीतु मशक्यत्वात , वृत्तिमन्मात्रमेव महाकाले कालिकसम्बन्धेन वर्तत इति निश्चयदशायां महाकालत्वादिहेतुकघटाद्यनुमितेरिव तदानीं मेयत्वादिलिंगकजात्याद्यनुमिते र्दुरपह्नवत्वात इति ।

इदन्तु तत्वम्, यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकं तेन सम्बन्धेन तद्रूपावच्छिन्नविशिष्टा वृत्तिविषयतावान् यः साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नविशिष्ट स्तद्वृत्तित्वं व्याप्तिः । धूमवान् वह्ने रित्यादौ हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदकं धूमत्वादिकं संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नसम्बन्धिनिष्ठस्य तत्सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, साध्यतावच्छेदकीभूत तादृशसम्बन्धेन धूमत्वाद्यवच्छिन्न विशिष्ट निष्ठविषयताच न तेन सम्बन्धेन धूमत्वाद्यात्मक तद्रूपावच्छिन्नविशिष्टा वृत्तिरिति नातिप्रसंगः । महाकालो घटवान् कालपरिमाणादित्यादौ साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकं गगनत्वादिकमेव - तादात्म्यादिना तद्विशिष्टसम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, तेन सम्बन्धेन तदवच्छिन्नविशि-

ष्टा वृत्तित्वंच कालिकसम्बन्धेन घटत्वाद्यवच्छिन्नविशिष्टनिष्ट विषयताया इति लक्षणसमन्वयः । धूमादिसमानाधिकरणस्य साध्यतावच्छेदकसंयोगादि सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितावच्छेदकं ज्ञानत्वादिकं वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्ध सामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, ज्ञानाद्यभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणत्वादिति वह्नित्वादे रवच्छेदकत्वप्रसंग इत्यत स्तेन सम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशनम् । संयोगादिना वह्न्यादिमन्निष्ठो ज्ञानाद्यभावश्च संयोगादिसम्बन्धधर्मिक उभयाभावघटित प्रतियोगिवैयधिकरण्याश्रय इति नदोषः । साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे काल स्सर्ववान् मेयत्वा दित्यादौ सर्वत्वस्या वच्छेदकत्वोपपत्तये उभयाभावघटितस्यैव प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया तादात्म्यादिना गगनादिसम्बन्धि गगनादिनिष्ठ गगनाद्यभावस्य कालिकसम्बन्धर्मिको भयाभावघटित प्रतियोगिवैयधिकरण्यशालितया कालो घटवान् महाकालत्वादित्यादौ अवच्छेदकाप्रसिद्धि तादवस्थ्य मिति तादृशसम्बन्धेन तन्निवेशितम् । सत्तावान् जाते रित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक विशिष्टसत्तात्वादे स्सत्तात्वविशिष्ट सम्बन्धिनिष्ट प्रतियोगिव्यधिकरणाभाव प्रतियोगितानवच्छेदकतया सत्तात्वादे रवच्छेदकत्वापत्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिवैयधिकरण्यमेव निवेशनीयम् ।

नच सर्वत्वावच्छिन्नस्य यत्र विषयितासम्बन्धेन साध्यता ज्ञानत्वादिकं हेतुः तत्रसर्वत्वस्य पारिभाषिकावच्छेदकत्वानुपपत्तिः, सर्वत्वविशिष्टस्य विषयितासम्बन्धेन सम्बन्धिनि सर्वविषयकज्ञाने तेनसम्बन्धेन प्रतियोगिव्यधिकरणाभावा प्रसिद्धेरिति वाच्यम्; घटत्वाद्यवच्छिन्नाविषयके सर्वत्वावच्छिन्नविषयके ऽस्मदादिज्ञाने घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोगितावच्छेदक

अतएव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभाव प्रतियोगितावच्छेदक गुणान्यत्वविशिष्टसत्तात्व तुल्यवृत्तिकत्वेऽपि सत्तात्वस्य -

---

घटत्वावच्छिन्नव्यधिकरणतया सर्वत्वस्य तादृशाभाव प्रतियोगितानवच्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वोपपत्तेः ।

नचैवमपि यत्र नित्यत्वविशिष्टसर्वत्वं साध्यतावच्छेदकं तत्रजन्यज्ञानस्य साध्यतावच्छेदकीभूत स्वविशिष्टासम्बन्धित्वात नित्यज्ञाने च अभावस्य प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्यस्या प्यसम्भवात तादृशसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वानुपपत्तिरिति वाच्यम् , नित्यत्वानधिकरणे नित्यत्वविशिष्टसर्वमितिज्ञाने विषयितया नित्यत्व विशिष्टसम्बन्धिताया अनपायात । तत्रतदसत्त्वे तुल्ययुक्त्या जन्यत्वविशिष्टस्य घटादेरपि ईश्वरज्ञानासम्बन्धितया तादृशविशिष्टाभावस्यैव ईश्वरज्ञानेविशिष्ट प्रतियोगिव्यधिकरणस्य सुलभत्वसम्भवात् । अन्यत्सर्वं पूर्ववद्बोध्यम् ।

यद्रूपावच्छिन्नस्य येनसम्बन्धेन सम्बन्धिनिवर्तमानस्य तेनसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकं तत्सम्बन्धिनिष्ठ तद्रूपावच्छिन्न प्रतियोगिकत्व भिन्नं यत्साध्यतावच्छेदकावच्छिन्न प्रतियोगिकत्वं तद्वत्साध्यतावच्छेदक सम्बन्धि सम्बन्धोवाव्याप्तिः । प्रतियोगित्वाद्यन्तर्भावा सहिष्णुतायां यद्रूपावच्छिन्नस्य यादृशसम्बन्धेनासम्बन्धित्वं हेतुमतस्तादृश सम्बन्ध निष्ठ तद्रूपावच्छिन्न प्रतियोगिताकत्वभिन्नत्वमेव साध्यतावच्छेदकावच्छिन्न प्रतियोगिकत्वे निवेशनीयमितिदिक् ।

यथाश्रुता नतिरिक्तवृत्तित्व पदार्थपरित्यागप्रयोजनं स्वयमेवदर्शयति (अतएवेति) ईदृशानतिरिक्तवृत्तित्व निवेशादेवेत्यर्थः (विशिष्टसत्तात्व तुल्यवृत्तिकत्वेपीति) स्वव्यापक स्वपर्याप्त्यधिकरण

नक्षतिः । एवं स्वविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकाव-च्छेद्यत्वं बोध्यं ।

पर्याप्तविशिष्ट सत्तात्वकत्वेपीत्यर्थः । " नक्षतिः " -नसत्तात्वादे रव-च्छेदकत्वापत्तिः । प्रतियोगिताधर्मिको भयाभावघटितव्याप्तिपक्षे वि-शिष्टसत्तात्वादे स्सत्तात्वाद्य न्यूनवृत्तितामादाया व्याप्तिवारणाय व्याप कत्वं परित्यज्यान्यादृशं मन्यूनवृत्तित्वं निवेशयति (एव-मिति) (स्वविशिष्टेति) स्वपदं साध्यतावच्छेदकपरं, तथाच प्र-तियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरण हेतुसमानाधिकर-णाभाव प्रतियोगितासामान्यवृत्ति तत्सम्बन्धावच्छेद्यत्व स्वविशिष्टसम्ब-न्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वोभयाभावकत्वं तेन स-म्बन्धेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः । विशिष्टसत्तात्वादे र्वि-शिष्टसत्तात्वाश्रयसम्बन्धि गुणादिनिष्ठाभाव प्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वा द्यवच्छेद्यत्वाभावस्य जातिसमानाधिकर-णाभाव प्रतियोगितायां सत्वेन विशिष्टसत्तावान् जातेरित्यादावति-व्याप्ति रतस्स्वविशिष्टेति । स्ववैशिष्टयश्च साध्यतावच्छेदकता घट-कसम्बन्धेन बोध्यं, अन्यथा - धूमवान् वह्नेरित्यादौ कालिकादिसम्ब-न्धेन धूवत्वादिविशिष्ट वह्न्यादिसंयोगिनिष्ठाभावप्रतियोगितायां धूमत्वा देरवच्छेदकतया तदनवच्छेदक द्रव्यत्वाद्यवच्छेद्यत्वाभावस्य हेतुस-मानाधिकरणाभाव प्रतियोगितासामान्ये सत्वेनातिव्याप्त्यापत्तेः । सम्ब-न्धित्वं साध्यतावच्छेदकसम्बन्धेनाग्रे विवक्षणीयं, अन्यथा - कालिका दिसम्बन्धेन धूमादिमतिसंयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नाभाव सत्वात् सम्बन्धसामान्येन धूमादिमन्निष्ठाभावीय संयोगादिसम्बन्धाव-च्छिन्नप्रतियोगि तानवच्छेदकं तादृश सम्बन्धावच्छिन्न प्रतियोगिता सामान्यानवच्छेदकं घटाभावत्वादिकमेव, अभावत्वादेः केवलस्यैव संयोगादिसम्बन्धावच्छिन्नाभाव प्रतियोगितावच्छेदकत्वेन तादृशगु-

द्धर्मस्यातथात्वात, भेदप्रतियोगितायां प्रसिद्धस्य तदवच्छेद्यत्वस्योभया भाव मादायोक्तस्थल एवातिव्याप्तिः । संयोगेन धूमत्वाद्यवच्छिन्नाभाव-स्योत्पत्ति क्षणावच्छेदेन धूमत्वादिविशिष्ट सम्बन्धिनिष्ठतया तादृशाभाव प्रतियोगितानवच्छेदक घटाभावत्वाद्यवच्छेद्यत्वाभाव मादाय तत्रैवाति व्याप्ते र्वारणाय प्रतियोगिव्यधिकरणत्वेना प्यभावो विशेषणीयः । तत्रच प्रतियोगिपदं प्रतियोगितावच्छेदकावच्छिन्नपरमेव, अन्यथा सत्तावान् जाते रित्यादौ सत्तात्वविशिष्टसम्बन्धिनिष्ठ प्रतियोगिव्यधिकरणाभाव प्रति-योगितानवच्छेदक विशिष्टसत्तात्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणा भावप्रतियोगितायां सत्त्वेना व्याप्त्यापत्तेः । वह्न्यादिमन्निष्ठस्य घटा द्यभावस्य कालिकसम्बन्धेन प्रतियोगिसमानाधिकरणतया सम्बन्ध सामान्येन प्रतियोगिव्यधिकरण तन्निष्ठाभावप्रतियोगितावच्छेदकं तदसमानकालीनघटादिव्यक्तिनिष्ठतद्व्यक्तित्वादिक मेवेति तदनवच्छेदक घटत्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वा दव्याप्ति रतः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं निवेश्यम् । ननु साध्यतावच्छेदकसम्बन्धेन, कालो घटवान् कालपरिमाणा दित्यादौ कालिकसम्बन्धेन साध्यतावच्छेदकविशिष्टसम्बन्धिनि खण्डकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणस्या भावस्यसुलभत्वेपि सर्ववान् कालपरिमाणादित्यादौ महाकालस्यैव कालिकसम्बन्धेन सर्वत्वविशिष्ट सम्बन्धितया तत्र तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः । कालिकसम्बन्धेन गगनादे र्वृत्तिमत्त्वपक्षे प्रतियोगिता-धर्मिकोभयाभावघटितलक्षणकरणात् तन्मते उभयाभावघटनयापि गगना-द्यभावे कालिकसम्बन्धेन वैयधिकरण्यस्य निर्वाहयितु मशक्यत्वात् ।

नच साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व मग्रे ऽभावप्रतियोगि-तायां निवेशयिष्यति, एवंच प्रतियोगितावच्छेदकसम्बन्धेन प्रतियो-गिवैयधिकरण्यनिवेशेपि सर्वत्वावच्छिन्नसाध्यके तदवच्छिन्नसम्ब-न्धिमहाकालनिष्ठस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधि

करणस्या भावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगित्वा-प्रसिद्धिः, कालिकातिरिक्तसम्बन्धावच्छिन्नाभावस्यैव प्रतियोगिताव च्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वात्- तत्प्रतियोगितायांच कालिकसम्बन्धावच्छिन्नत्वविरहा दित्यव्याप्ति तादवस्थ्यमिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो यः स्वविशिष्ट सम्बन्धिनिष्ठो ऽभाव स्तत्प्रतियोगितासामान्ये यद्यत्सम्बन्धावच्छिन्नत्व यद्यद्धर्मावच्छिन्नत्वोभयाभावः तत्सम्बन्धावच्छिन्नत्व तद्रूपावच्छिन्नत्वो भयाभावव त्तादृशहेतुसमानाधिकरणाभाव प्रतियोगितासामान्यकं यद्य त्त्वं तद्धर्मवत्त्वं तेन सम्बन्धेन व्यापकत्वमिति विवक्षया सर्वसामञ्ज स्यात् । सर्वत्वविशिष्टसम्बन्धिनि महाकाले समवायादिना प्रतियोगिव्यधिकरणस्य तत्सम्बन्धावच्छिन्न घटाद्यभावस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्व सर्वत्वावच्छिन्नत्वोभयाभावस्य सत्त्वात् साधनसमानाधिकरण तथाविधघटाद्यभावप्रतियोगितायामपि तथा विधोभयाभावसत्त्वेन कालिकसम्बन्धेन सर्वत्वावच्छिन्नस्य काळपरिमाणादिव्यापकत्वोपपत्तेः ।

नचैवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगित्वा विशेषणतया ' प्रतियोगित्वं साध्यतावच्छेदकसम्बन्धेन वाच्य ' मित्य ग्रिमग्रन्थविरोध इति वाच्यं, तादृशग्रन्थस्यापि उक्तोभयाभावविशेषणतायामेव तात्पर्यात् ।

वस्तुतस्तु - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व विशेषितप्रति योगितासामान्ये प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण स्वविशिष्टसम्बन्धिनिष्ठाभावीयत्व यद्रूपावच्छिन्नत्वोभयाभाव स्तादृश धर्म एव अनवच्छेदकान्तार्थ इति नाग्रिमग्रन्थविरोधः । नवा महा काल स्सर्ववान् महाकालपरिमाणा दित्यादा वप्रसिद्धिः, प्रसिद्धायां कालिकसम्बन्धावच्छिन्न घटाद्यभावप्रतियोगितायां सर्वत्वविशिष्टसम्बन्धि महाकालनिष्ठो यः समवायसम्बन्धेन प्रतियोगिव्यधिकरणः त-

तादृश प्रतियोगिताश्च विशिष्यो पादेयाः,

त्सम्बन्धावच्छिन्न घटाद्यभाव स्तदीयत्व सर्वत्वाद्यवच्छिन्नत्वोभया भावस्य सुलभत्वात् ।

ननु-स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तादृशावच्छेदकत्वावच्छिन्न प्रतियोगिताकभेदः, तादृशावच्छेदकप्रतियोगिकभेदस्य तादृशावच्छेदक यत्किञ्चिद्भिन्न तादृशावच्छेदक साधारणत्वात, तथाच लघुरूपसमनियतंयत्र गुरुरूपं तद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य तादृशलघुरूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वात्मक स्वसमनियतधर्मापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया तादृशावच्छेदकत्वावच्छिन्न भेदाप्रसिद्ध्या द्वितीयावच्छेदकलक्षणस्य मेयधूमत्वादौ- प्रतियोगिताधर्मिको भयाभावघटित व्याप्तिलक्षणस्य प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः, प्रतियोगिताधर्मिक उभयाभावघटितलक्षणे अनवच्छेदकान्तेन स्वविशिष्टसम्बन्धि निष्ठाभावप्रतियोगितासामान्ये यद्रूपावच्छिन्नत्व साध्यतावच्छेकसम्बन्धावच्छिन्नत्वोभयाभाव स्तद्रूपविवक्षणे स्वविशिष्टसम्बन्धि निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्न भेदाप्रवेशेपि सामान्यपदार्थघटकतया स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेद प्रतियोगितावच्छेदकत्वावच्छिन्नभेदरूपस्य तादृशप्रतियोगितात्वव्यापकत्वस्य उभयाभावविशेषणतया प्रवेशात् प्रमेयवह्नित्वावच्छिन्नसाध्यके-तद्रूपविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितानिष्ठभेद प्रतियोगितानवच्छेदकावच्छिन्न भेदाप्रसिद्ध्येवाव्याप्तिः । साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगितासामान्ये स्वविशिष्टसंबन्धिनिष्ठाभावीयत्व यद्रूपावच्छिन्नत्वोभयाभाव स्तद्रूपस्यानवच्छेदकांतार्थत्वे प्रमेयवह्नित्व विशिष्टसंबन्धिनिष्ठाभावीयत्व घटितोभयत्वावच्छिन्नाभावाप्रसिद्ध्यैवा व्याप्तिरित्याशंक्याह (तादृशप्रतियोगिताश्चेति) स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितास्त्वित्यर्थः । 'विशिष्य'-तत्तद्व्यक्ति

त्वेन, नतु तादृशप्रतियोगितात्वेनेत्यर्थः। तथाच्चवस्तुगत्या याया स्स्वविशिष्टसम्बन्धिनिष्ठाभाव निरूपिताः प्रतियोगिता स्तत्तदवच्छेदकत्वावच्छिन्नभेद कूटवत्त्वमेवानवच्छेदकान्तार्थइति गुरुधर्मविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदकत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि नक्षतिः ।

यद्यपि घटत्वावच्छिन्नाभावीया या प्रतियोगिता तदवच्छेदकत्वं घटत्वादिनिष्ठ तत्तद्व्यक्तित्वादि समनियतमिति तदपेक्षया गुरुत्वेन नप्रतियोगितावच्छेदकमिति तादृशप्रतियोगिताविशिष्योपादाया नवच्छेदकत्वादिकं दुर्वचं, तथापि यत्रप्रतियोगितायां समशरीर नानाधर्मसमनैयत्यं तत्र नानाधर्माणामेवैक प्रतियोगितायामवच्छेदकतयावच्छेदकनिष्ठ तत्तद्व्यक्तित्वानां लघुत्वेपि तत्प्रतियोगितावच्छेदकत्वन्यूनवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमव्याहतमेवेति तादृशप्रतियोगितानां विशिष्यनिवेशाभिप्रायकोयंग्रन्थः। अन्यादृश प्रतियोगितावच्छेदकानाञ्च तत्तद्व्यक्तित्वेनैव भेदोनिवेश्यः।

नचावच्छेदकभेदेन प्रतियोगिताभेदात् नानाधर्मावच्छिन्नैकप्रतियोगित्वासम्भवइति वाच्यम्, अवच्छेदकासमनैयत्यस्यैव प्रतियोगिताभेदकत्वात; समनियत नानाधर्मावच्छिन्न प्रतियोगितैक्ये बाधकविरहात् । एवं यत्रानुगतैक रूपावच्छिन्न नानाव्यक्तीनामेकप्रतियोगितायामवच्छेदकत्वं तत्रा प्यवच्छेदकनिष्ठ तत्तद्व्यक्तित्वानां न्यूनवृत्तितया तत्रापि तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्व मक्षतम् ।

नच तत्रापि तत्प्रतियोगिता निरूपितावच्छेदकत्व वृत्त्यनुगतरूपावच्छिन्नैकावच्छेदकताया स्तद्व्यक्तित्वेन भेदप्रतियोगितायामवच्छेदकत्वसम्भवात तत्प्रतियोगितावच्छेदकत्वत्वविशिष्टावच्छिन्न भेदोऽप्रसिद्ध्या निवेशयितु मशक्यएवेति वाच्यम्, तादृभेदनिवेशासंभवेपि

नातोगुरोरवच्छेदकत्वं विना दुर्वचत्वं ।

अवच्छेदकतासम्बन्धेन तत्प्रतियोगितावच्छिन्नभेद निवेशे ऽविरोधेन प्रतियोगितानां विशिष्यानिवेशनोक्तिसंगतेः । नह्याश्रयतासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नावच्छेदकताया अवच्छेदकत्वापेक्षया ऽवच्छेदकतासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः अवच्छेदकत्वेगौरवं, येनोक्तभेदस्याप्रसिद्धिस्स्यात् । एवं धूमत्वादेरपि धूमत्वादिविशिष्ट सम्बन्धिनिष्ठाभावप्रतियोगितायां महानसीयत्वादि सहितस्यावच्छेदकतया धर्मान्तरसहित रूपावच्छिन्नप्रतियोगितावच्छेदकानां तत्तद्व्यक्तित्वेन भेदनिवेशो नसम्भवतीति धूमत्वादे धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वानुपपत्तिः, विशेषणावच्छिन्नधूमत्वादिनिष्ठ तद्व्यक्तित्वस्यापि विशेष्यधूमत्वादि पर्याप्ततया तदवच्छिन्नभेदस्य विशेष्यभूत धूमत्वादावसम्भवादिति तत्तत्प्रतियोगितावच्छेदकस्य तादृशावच्छेदकत्वावच्छिन्नभेदएवनिवेश्यः, तथासति तादृशप्रतियोगितावच्छेदकताया व्यासज्य वृत्तितया धूमत्वादौ प्रत्येकंतदवच्छिन्न भेदसत्वेनोक्तानुपपत्त्यनवकाशात ।

नच तत्रावच्छेदकताव्यक्तेः तत्तद्व्यक्तित्वेन भेदप्रतियोगितावच्छेदकत्वं सम्भवतीति दर्शितरूपावच्छिन्न भेदाप्रसिद्धि रिति शंकास्पदमपि, महानसीयत्व धूमत्वादिनिष्ठावच्छेदकताना मवच्छेदकसम्बन्धादिभेदेन भिन्नतया तत्तद्व्यक्तित्वेन तासा मव्यासज्य वृत्तितया धूमत्वादिनिष्ठ भेदप्रतियोगितावच्छेदकत्वासम्भवात , तत्तत्प्रतियोगितावच्छेदकतात्वेनच व्यासज्य वृत्तितया तेनैव रूपेण तादृशभेदप्रतियोगितावच्छेदकत्वात (दुर्वचत्वमिति) पारिभाषिकावच्छेद्यावच्छेदकभावस्येति शेषः । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायां यदि सम्बन्धविशेषावच्छिन्नत्वं ननिवेश्यते तदा प्रतियोगितावच्छेदकमात्रस्यैव वह्नित्वादिविशिष्ट

सम्बन्धिनिष्ठ किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् तादृशप्रतियोगितानवच्छेदकावच्छेद्यत्वाप्रसिद्ध्या ऽसम्भवः, महानसादिनिष्ठ समवायसम्बन्धावच्छिन्न वह्न्याद्यभावस्य साध्यतावच्छेदक संयोगादिसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेप्ये तल्लक्षणे प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यैव निवेशेन तादृशाभावाव्यावर्तनात् ।

नचाकाशाभावत्वादिकमेव तादृशाभावप्रतियोगिता ऽनवच्छेदकं, संयोगसमवायादि सम्बन्धावच्छिन्नाकाशाभावाभावादि प्रतियोगितायां शुद्धस्याभावत्वादेरेव लघो रवच्छेदकत्वात् , तादृशधर्मावच्छेद्यत्वंच स्वरूपसम्बन्धावच्छिन्ना काशाभावाभावात्मकाकाशादि निरूपितप्रतियोगितायां प्रसिद्धमिति वाच्यम् । आकाशाभावत्वादेरपि साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् । आकाशाभाव वह्निमदन्यतरत्वादेः वह्न्यादिमन्निष्ठ भेदप्रतियोगितानवच्छेदकत्वेपि विषयितादिसम्बन्धावच्छिन्न तन्निष्ठाभावप्रतियोगितावच्छेदकत्वं दुर्वारमेव, तदुभयैकतरमात्रविषयकज्ञानादौ विषयितासम्बन्धेनान्यतरत्वावच्छिन्नाभावासत्वात, अभावत्व - वह्निमत्वावच्छिन्नाभावस्यच सत्वात्, अभावत्ववह्निमत्वादेः तादृशसम्बन्धावच्छिन्नान्यतराभाव प्रतियोगितावच्छेदकत्वासम्भवात् । विषयितादे र्वृत्यनियामकतया अभावप्रतियोगितावच्छेदकसम्बन्धत्वा नुपगमेतु धूमवान्वह्नेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितायां आकाशाभाव धूमवदन्यतरत्वादिरूप धूमादिमन्निष्ठाभाव प्रतियोगितानवच्छेदकावच्छिन्नत्वस्य उभयाभावमादायातिव्याप्तिरित्यत एतल्लक्षणेप्रतियोगितायां साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वं दर्शितप्रयोजनानुरोधेन द्वितीयावच्छेदकलक्षणेच साध्यतावच्छेदक सम्बन्धात्मक स्वविशिष्ट सम्बन्धित्वञ्च निवेशयति

प्रतियोगित्वं सम्बन्धित्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम्, अतो न सम्बन्धभेदमादाय दोषः । कालिकविशेषणताविशेषेण च साध्यतायां तादृश प्रतियोगितावच्छेदकत्व मनित्यतत्तद्व्यक्तित्वे प्रसिद्धम् । अभावश्च प्रतियोगिव्यधिकरणो बोध्यः । न च मौल मिदमीयञ्च प्रतियोगिवैयधिकरण्य मनुपादेयं, संयोगत्वावच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेः

(प्रतियोगित्वमित्यादिना) कालोघटवान् कालपरिमाणा दित्यादौ घटत्वादिविशिष्टसम्बन्धिनि महाकालप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणोयोभाव स्तदीय साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगित्वाप्रसिद्धावपि यथाश्रुतस्य प्रतियोगिता धर्मिकोभयाभाव घटितलक्षणस्य नतत्रा व्याप्तिप्रसक्तिः, खण्डकालस्यापि तद्विशिष्ट सम्बन्धितया तन्निष्ठस्यातीतानागतव्यक्तीनामेव तादृशाभावस्य तथाविधप्रतियोगिताप्रसिद्धेरित्याह (कालिकेति) कल्पत्रयएवाभावे प्रति योगिवैयधिकरण्यं निवेशयति (अभावश्चेति) (बोध्यइति) अन्यथा-अव्याप्यवृत्तिसाध्यक व्यभिचारिण्यतिव्याप्तेरितिशेषः । अव्याप्यवृत्ति संयोगादिसाध्यके व्यभिचारिण्यतिव्याप्ति मवच्छेदकलक्षण घटकाभावे प्रतियोगिवैयधिकरण्य विशेषणप्रक्षेपमन्तरेणा प्युद्धरंस्तादृशविशेषणस्य तदसत्त्वे हेतुसमानाधिकरणाभावे तादृशविशेषण स्यापि दर्शितव्यावृत्त्यसंगते स्तस्यचा नुपादेयत्व माशंकते (नचेत्यादिना) “ मौलम् ”- मूलस्थं हेतुसमानाधिकरणाभावे तद्विशेषणं । मौलस्यानुपदेयत्वे हेतुभूताव्याप्त्यनवकाशे हेतुमाह (संयोगत्वावच्छिन्नाभाववतीति) द्रव्यादावितिशेषः (संयोगत्वादिविशिष्टस्यवृत्तेरिति) तथाच तदनुपादानेपि संयोगिद्रव्यत्वादित्यादौ संयोगित्वादिरूप साध्यतावच्छेदके स्वरूपसम्बन्धरूपोक्त प्रतियोगितावच्छेदकत्वसत्त्वेपि निरुक्तोभयविध पारिभाषिकावच्छेदकत्वस्यासत्वात्

गुणादिनिष्ठाभाव प्रतियोगितावच्छेदक द्रव्यत्वत्व द्रव्यमात्रसमवेतत्वाद्यव
च्छिन्नाभाववतिचावृत्ते रव्याप्तयतिव्याप्तयोरनवकाशादिति वाच्यम् ।

उक्तप्रतियोगितायां तद्विशिष्टसम्बन्धि निष्ठाभावप्रतियोगितानवच्छेदका वच्छेद्यत्वाभावस्यच सत्वा न्नाव्याप्तिरिति भावः । इदमीयस्य तद्विशेषणस्या नुपादेयत्वे हेतुभूताविव्याप्तयनवकाशे हेतु माह (गुणादीति) द्रव्येतरा ऽसमवेतत्वमात्रस्यैव द्रव्यत्वात्यन्ताभावविरोधितावच्छेदकतया तत्प्रतियोगितावच्छेदकत्वसम्भवात सकलद्रव्य समवेतत्वरूपाधिकांशघटित द्रव्यत्वत्वं नात्यन्ताभावप्रतियोगिताव च्छेदक मित्यपरितोषात (द्रव्यमात्रसमवेतत्वेति) (अवृत्तेरिति) संयोगत्वादिविशिष्टस्ये त्यनुषज्यते । तथाच तदनुपादानेपि संयोगि सत्त्वादित्यादौ नातिव्याप्तिः । अवच्छेदकलक्षणस्थ तत्पदेन संयोग त्वाद्युपादानासम्भवेपि द्रव्यत्वत्वादिक मादायैव संयोगत्वादौ पारिभाषिकावच्छेदकत्वस्य सूपपादत्वात्, संयोगत्वादौ संयोगत्वादिविशिष्टसम्बन्धि निष्ठाभावप्रतियोगितानवच्छेदकत्वविरहेपि तादृशप्रतियोगितानवच्छेदक द्रव्यत्वत्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभाव प्रतियोगितायां सत्त्वेन तत्र निरुक्तोभयाभावासत्वाच्चेति भावः । समवायादिना ऽव्याप्यवृत्तिसाध्यके तेन सम्बन्धेन साध्यतावच्छेदक विशिष्टव्यापकतावच्छेदकस्य व्याप्यवृत्तितावच्छेदक धर्मान्तरस्य साधननिष्ठव्यभिचारानिरूपकतावच्छेदकस्य सम्भवेनातिव्याप्त्युद्धारेपि संयोगेना व्याप्यवृत्तेः साध्यताया मतिव्याप्ति र्दुर्वारैव , संयोगेन किंचिद्रूपावच्छिन्नस्य व्याप्यवृत्तिताविरहात । साधनवन्निष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य साध्यवन्निष्ठ तत्सम्बन्धावच्छिन्नाभाव प्रतियोगितावच्छेदकत्वनियमेन तत्सम्बन्धावच्छिन्न तदवच्छिन्नाभावव दसम्बन्धस्वविशिष्टसामान्यकत्वस्या संयुक्तमात्र वृत्तिगुणत्वादावेव प्रसिद्धेरिति इदमीयप्रतियोगिवैयधिकरण्यविशेषणो

धूमवान्वह्नेरित्यादावतिव्याप्तेः । नह्युत्पत्तिकालावच्छेदेनापि महानसादौ
किञ्चित् संयोगेन वर्त्तते, येन वह्निमदयोगोलकनिष्ठात्यन्ताभाव प्रतियोगि-
तावच्छेदकायोगोलकावृत्ति द्रव्यत्वाद्यवच्छिन्नाभाव वदवृत्तित्वं धूम-

---

पादान मावश्यकम् , तदावश्यकत्वेच हेतुसमानाधिकरणाभावे तद्वि
शेषणस्या प्यावश्यकता, अन्यथा संयोगिद्रव्यत्वा दित्यादावेवाव्याप्तेरिति
समाधत्ते (धूमवानिति)ननु धूमादिमत्यपि पर्वतादौ शिखराद्यवच्छेदेन धूम
त्वाद्यवच्छिन्नाभावसत्त्वात्तेन रूपेण धूमादीनां व्याप्यवृत्तिताविरहेपि अयो-
गोलकावृत्तिद्रव्यत्वादिना तेषां तथात्व मव्याहतमेव, शिखराद्यवच्छेदेनापि
तदवच्छिन्नद्रव्यान्तरसत्त्वादिति साधनाव्यापकतावच्छेदक तादृशधर्मा
वच्छिन्नाभाववत्त्व मयोगोलकादेरेव, धूमत्वादि विशिष्टस्य तदसम्ब
द्धत्वा न्नातिव्याप्तिरित्याशंकां निराकरोति (नहीति) (उत्पत्तिका
लेति) तथाच धूमवति किंचिद्देशावच्छेदेना योगोलकावृत्ति द्रव्य-
त्वा द्यवच्छिन्नाभावासत्त्वेपि कालविशेषावच्छेदेन तदवच्छिन्नाभाव
स्य तत्र सत्त्वात , धूमत्वादे रवच्छेदकत्वं दुर्घटमेवेति भावः । द्वि·
तीयकल्पे अवच्छेदकाप्रसिद्धया तिव्याप्तिविरहेपि प्रथमकल्पे प्रति
योगिताधर्मिको भयाभाव घटितलक्षणेच धूमत्वादिविशिष्टसम्बन्धिनिष्ठ
संयोगसम्बन्धावच्छिन्नाभाव प्रतियोगितानवच्छेदक घटाभावत्वाद्यव
च्छेद्यत्व संयोगसम्बन्धावच्छिन्नत्वो भयाभावमादाया तिव्याप्तिर्बोद्धया ।

वस्तुतो द्वितीयावच्छेदक लक्षणेपि प्रतियोगि वैयधिकरण्या
प्रवेशे संयोगेन साध्यतायां सद्धेतौ तादृशावच्छेदकाप्रसिद्धया व्याप्ति·
रस्यादिति साध्यतावच्छेदके स्वविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियो-
गितानवच्छेदक हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदककं यद्य
त् तद्भेदस्थाने स्वविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदक
तादृशप्रतियोगितावच्छेदक सामान्यकत्वं निवेश्यैव तादृशाव्याप्ति
र्वारणीयेति , तथैवातिव्याप्ति रसद्धेतौ स्यादित्यत्र तात्पर्यम् ।

अथैवमपि प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्य पर्यन्त विशेषण मकिंचित्करमेव, हेतुसमानाधिकरणाभावे यथाश्रुतप्रतियोगि वैयधिकरण्य निवेशनेपि गुणान्यत्वविशिष्ट सत्तावान् जाते रित्यादौ हेतुसमानाधिकरण प्रतियोगिव्यधिकरणाभाव प्रतियोगितावच्छेदक गुणासमेवतत्वाद्यनतिरिक्त वृत्तित्वस्य साध्यतावच्छेदके सत्वेना तिव्याप्ते रनवकाशात् । हेतुसमानाधिकरणाभाव विशेषण प्रतियोगि वैयधिकरण्यशरीरे प्रतियोगि तावच्छे - दकावच्छिन्नत्वा निवेशने द्रव्यं गुणा दित्यादौ प्रथिव्यन्यत्वविशिष्टद्रव्यत्वाद्यभावस्य प्रतियोगिताश्रयानधिकरण हेत्वधिकरणकत्वाभावेन लक्षणाघटकतया विशिष्टद्रव्यत्वत्वे द्रव्यत्वत्वविशिष्टसम्बन्धिनिष्ठ स्वप्रतियोगिव्यधिकरणाभावप्रतियोगितानच्छेदकत्वे प्यतिव्याप्त्यनवकाशेने दमीयप्रतियोगिवैयधिकरण्यशरीरेपि तन्निवेशन व्यावृत्त्यसम्भवात ।

यत्तु - प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे यत्प्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्यादिक्रमेण व्याप्ति र्निर्वाच्या, तथाच प्रतियोगितायाः प्रतियोगिस्वरूपत्वे वह्न्यादिव्यक्तिभेदेन तन्निष्ठप्रतियोगितानां भेदात वह्नित्वाद्यवच्छिन्न महानसीयवह्न्यादिनिष्ठ प्रतियोयोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्वात वह्निमान् धूमादित्यादा वव्याप्तिरिति । तदसत, प्रतियोगितायाः प्रतियोगि स्वरूपत्वे महानसीयवह्नित्वाद्यवच्छिन्न प्रतियोगितायाः वह्नित्वाद्यवच्छिन्न महानसीयवह्न्यादिनिष्ठ प्रतियोगित्वाभिन्नतया प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वनिवेशेपि वह्नित्वाद्यवच्छिन्न प्रतियोगितावच्छेदकमहानसीय वह्नित्वाद्यवच्छिन्नानधिकरणत्व मादाय तद्दोष तादवस्थ्यात् । द्रव्यत्वादेरपि धूमादिस्वरूप धूमत्वाद्यवच्छिन्न प्रतियोगितावच्छेदकत्वेन प्रतियोगितावच्छेदक सामान्यावच्छिन्नानधिकरणत्वनिवेशेपि अयोगोळकादावपि धूमत्वाद्यवच्छिन्नप्रतियोगि-

तावच्छेदक सामान्यावच्छिन्नानधिकरणत्वस्य दुर्लभतया तथाविव-क्षणासम्भवात् ।

यदि च यादृशरूपावच्छिन्न प्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत स्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया महानसीयवह्नित्वादे र्वह्नित्वाद्यवच्छेद्यतावच्छेदक वह्निवृत्तिप्रतियोगित्वत्वावच्छिन्नानवच्छेदकत्वान्न दोष इत्युच्यते, तदा यद्रूपावच्छिन्नप्रतियोगिताश्रयानाधिकरणत्वं हेतुमत स्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशेपि सामञ्जस्यात् ।

मैवं, प्रतियोगितावच्छेदका वच्छिन्नत्वानुपादने एतद्रूपान्यत्व-विशिष्टसत्तावान् जातेरित्यादावतिव्याप्ते र्दुर्वारत्वात्, तत्र हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकस्य एतद्रूपासमवेतत्वादे रेतद्रूपविजातीय रूपान्तरसाधारण मेतद्रूपान्यत्व विशिष्टसत्तात्वावच्छिन्नं प्रति समवायेन व्यापकतानवच्छेदकत्वात् । सम्बन्ध भेदनिबन्धन दोष-वारणाय हेतुसमानाधिकरणाभाव प्रतियोगित्व तदवच्छेदकानतिरिक्त वृत्तित्व घटकप्रतियोगितयो र्यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यते तदैवं प्रतियोगिवैयधिकरण्य द्वयानुपादाने संयोगेनसाध्यतायां व्यभिचारिणि दर्शितरीत्यातिव्याप्तिरापद्यते । यदि च तद्दोषवारणाय हेतुमन्निष्ठाभावीय यत्सम्बन्धावच्छिन्न प्रतियोगितायां यदव-च्छेदकं तत्सम्बन्धावच्छिन्न तदवच्छिन्नाभावव दसम्बद्ध स्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावीय तत्सम्बन्धावच्छिन्न प्रतियोगितानवच्छेदकतत्कत्वंवा निवेश्यते, उभयत्र विशिष्यविशेषणताविशेषसम्बन्धएववा, तदा धूमवान् वह्नेरित्यादौ सम्बन्धान्तरेण विशेषणताविशेषादिना प्रतियोगिवैयधिकरण्या घटितसाध्यव्यापकताया मवच्छेदकस्य तत्सम्बन्धघटित हेत्वव्यापकतावच्छेदकायोगोळकभेदत्वादेः प्रसिद्ध्या धूमत्वादे रवच्छेदकत्वोपपत्ते रतिव्याप्त्यनवकाश इत्यालोच्य साध्यतावच्छेदकसम्बन्धानिवेशपक्षे प्रतियोगिवैयधिकरण्यद्वय-

त्वविशिष्टस्य सम्भाव्येत । प्रतियोगितयो रेकसम्बन्धावच्छिन्नत्वस्य विशेषणता विशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रति

स्यानुपादेयतामाह (प्रतियोगितयोरिति) यद्यपि वह्निधूमादिनिरूपित संयोगसंबन्ध घटितव्यापकता विशिष्यसमवायादिसंबन्धावच्छिन्नप्रतियोगिताद्वय घटितपारिभाषिकावच्छेदकत्व मन्तर्भाव्यापि निर्वक्तुं शक्यते, तथासत्यप्यनतिप्रसङ्गात् , तादृशहेतुसमानाधिकरणाभावीय समवायसम्बन्धावच्छिन्न प्रतियोगितावच्छेदकस्य यद्विशिष्ट संयोगिनिष्ठ तत्संबन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वं तदन्यत्वस्य तद्धेतुव्यापकतावच्छेदकसाधारण्याभावात्, यत्राधिकरणे तदवच्छिन्नस्य व्यभिचार स्तदसमवेतत्वस्य हेतुमन्निष्ठ समवाय सम्बन्धावच्छिन्न प्रतियोगितावच्छेदकस्य संयोगेन तद्धर्मविशिष्टं प्रति समवायेन व्यापकताया मवच्छेदकतया तादृशधर्माणां पारिभाषिकावच्छेदकताध्रौव्यात् । तथापि विशेषणताविशेषादिघटितव्यापकतायां समवायादिसम्बन्धावच्छिन्न? प्रतियोगिताद्वयघटितावच्छेदकत्वानिवेशे महानसभेदत्वादिविशिष्टस्य विशेषणताविशेषादिना यः सम्बन्धी सामान्यादि स्तन्निष्ठाभावीय समवायादिसम्बन्धावच्छिन्न प्रतियोगितानवच्छेदकत्वस्य वह्न्यादिसमानाधिकरणाभावीय तत्सम्बन्धावच्छिन्न प्रतियोगितावच्छेदकेऽसम्भावितत्वा न्महानसभेदत्वादे रपि वह्न्यादि व्यापकतावच्छेदकताप्रसंगात् , तत्र विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताद्वय घटितावच्छेदकत्वाभावरूप व्यापकतावच्छेदकत्व मेवानुमित्यौपयिकं वाच्यम् , तथाच सर्वत्र तादृशावच्छेदकत्वाभावज्ञानस्यैवा नुमितिहेतुत्व मुचितं, एकजातीयावच्छेदकत्वा भावसत्त्वानुरोधा दित्याशयेनाह (विशेषणताविशेषेणेति) (अनुपादेयमिति) तथाच साध्यतावच्छेदकसम्बन्धनिवेशाभिप्रायेण मूलकृता प्रतियोगिवैयधिकरण्य मुपात्तमिति भावः । अतिव्याप्तिवारण

योगि वैयधिकरण्यद्वयम् । यत्राधिकरणे व्यभिचार स्तदन्यत्व

प्रकारं दर्शयति (यत्राधिकरण इति) साध्यतावच्छेदकस्यापि कालिकसम्बन्धेन साध्यवद्वृत्ते रभावस्य प्रतियोगितावच्छेदकतया येन सम्बन्धेन हेतुमद्वृत्तित्व मभावस्य तेन सम्बन्धेन स्वविशिष्ट सम्बन्धिनिष्ठत्वं वाच्यं, उभयत्र विशेषणताविशेष एववा अभावस्य सम्बन्धः । एतत्कल्पेच घटभिन्नं मेयत्वादित्यादौ घटादिभेदाभावस्य घटत्वादिरूपस्य तद्व्यक्तिभेदाभावस्य तदीयासाधारणधर्मरूपाद्यात्मक तद्व्यक्तित्वस्यच्च विशेषणताविशेषेणावृत्ते र्घटभेदत्वादे र्लक्षणघटकत्वा सम्भवः , एतद्घट तद्घटान्यतरत्वावच्छिन्न भेदाभावस्य तादृशा न्यतरत्वस्य भेदविशेषात्मकतया तादृशसम्बन्धेन वृत्तावपि तादृश भेदत्वानुसरणे प्रयासगौरवम् , गगनभिन्नं मेयत्वादित्यादौ व्यभिचारनिरूपकाधिकरण गगनभेदाभावस्य शब्दात्मकस्य गगननिष्ठा न्यविशेषरूपस्यवा समवायेनैव गगनवृत्ते स्तद्भेदत्वस्य लक्षणघटक त्वासम्भवात व्यभिचारनिरूपकाधिकरणान्यत्व मादायातिव्याप्तिनिराकरणायोगश्चेति तदन्यत्वप्रकारक प्रमाविषयत्वत्वानुधावनम् ।

यत्तु - अयं घटो घटतद्भेदान्यतरत्वादित्यादौ व्यभिचारनिरूप काधिकरणघटादिभेदस्य यो भेद स्तस्य भेदधारानवस्थाभयेनाधिक-रणस्वरूपस्य साध्यवति घटादौ नविशेषणतया वृत्तिः, द्रव्यादिरूपा भावस्य विशेषणतानभ्युपगमादिति तदन्यत्वं नतत्सम्बन्धेन व्यापक ताया मवच्छेदकमिति प्रमाविषयत्वत्वानुधावनमिति । तदसत् , घटादि रूपभेदस्य घटादौ वृत्तिनियामकसम्बन्धान्तराभावेन भेद त्वरूपेण वृत्तिनियामकस्वरूपसम्बन्धस्या ऽवश्योपेयत्वात् ।

अयोगोळकान्यत्वप्रकारक प्रमाविषयत्वत्वापेक्षया धूमादिप्रकारकप्र-माविषयत्वत्वे धूमादिव्यापकतावच्छेदकत्व माशुग्राह्य मित्याशयेन तदेवानु

प्रकारकप्रमाविषयत्वत्व साध्यवत्त्वप्रकारक प्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्ट साध्यवन्निष्ठात्यन्ताभाव प्रतियोगितानवच्छेदकत्वा द्धेतुतावच्छेदकविशिष्ट हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदकत्वा द्व्यतिव्याप्ते रनवकाशात् । तथाच विशेषणताविशेषावच्छिन्न यद्धर्मविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकावच्छेद्यत्वं

सरति(साध्यवत्त्वप्रकारकेति)साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः (प्रतियोगितेति) अभावीयविशेणतासम्बन्धावच्छिन्नप्रतियोगितेत्यर्थः । (अतिव्याप्तेरिति) अवच्छेदकताघटकाभावे प्रतियोगिवैयधिकरण्या निवेशेपि धूमवान् वह्ने रित्यादावित्यादिः । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वोक्ते रर्थतः स्वविशिष्ट सामान्ये तदवच्छिन्नाभावव दसम्बन्धित्वं लभ्यत इति कल्पद्वय एवातिव्याप्तिनिरासो लभ्यते । अत्रानवच्छेदकत्वघटितव्याप्तिलक्षणे यथाश्रुत प्रथमनिरुक्तावच्छेदकताया निवेशे जातिमा न्मेयत्वादित्यादौ सामान्यादिसमवेतत्वाप्रसिद्ध्या जातित्वादे रवच्छेदकताया दुरुपपादत्वेना तिव्याप्तिः, अवच्छेदकलक्षणे स्वविशिष्ट प्रतियोगिक साध्यतावच्छेदक सम्बन्धे तदवच्छिन्नाभावव दननुयोगिकत्व निवेशने कालो घटवान् कालपरिमाणा दित्यादौ अवच्छेदकाप्रसिद्धिः, गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेः; एवं चरमनिरुक्तावच्छेदकतानिवेशपक्षेपि तत्रावच्छेदकाप्रसिद्धिः, साध्यतावच्छेदक सम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽ प्रसिद्धेः, दर्शितरीत्यनुसरणेच गौरवमिति कालिकसम्बन्धेन गगनादे रवृत्तित्वपक्षेपि प्रतियोगिताधर्मिक पारिभाषिकावच्छेद्यत्वाभाव घटितव्याप्तिरेवावलम्बनीयेत्याशयेन तत्पक्षमालम्ब्यैव निष्कृष्टार्थमाह (तथाचेति) प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व निवेशपक्षे तस्यावच्छेद्यत्वाभावानुयोगि

विशेषणतानसम्भवति, स्वावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरण हेतुमन्निष्ठाभावीय साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगिताया-दर्शितस्थले ऽप्रसिद्धेरिति तत्पक्षे प्रतियोगिदिशि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्योभयाभावो निवेशितः । विशेषणताविशेषरूप सम्बन्धनिवेशेच हेतुसमानाधिकरण कालभेदाद्यभावस्यैव तत्सम्बन्धावच्छिन्नप्रतियोगित्वप्रसिद्ध्या तत्सम्बन्धावच्छिन्नप्रतियोगिताधर्मिक तादृशावच्छेद्यत्वमात्राभाव निवेशोऽपि सम्भवतीत्युभयाभावोपेक्षा ।

यद्यपि – हेतुसमानाधिकरणाभाव प्रतियोगितासामान्ये साध्यतावच्छेदकावच्छिन्न समानाधिकरणाभाव प्रतियोगितावच्छेदकावच्छेद्यत्व निवेशेनैवोपपत्तावभावद्वय निवेशनमनतिप्रयोजनं, तथापि तदनिवेशे-प्रतियोगितायां पारिभाषिकसाध्यतावच्छेदकावच्छेद्यत्वाभावस्य लक्षणाघटकतया लक्षणान्तरमेवेदंस्याद्, नतु मूलोक्तलक्षणार्थइति तदुपादानम् । यथासन्निवेशेचावैयर्थ्यम् । अन्यथा साधनसमानाधिकरणाभावप्रतियोगिता सामान्ये साधनसमानाधिकरणसामान्येवां यद्धर्मविशिष्ट सम्बन्धिनिष्ठाभावीयत्वं यद्धर्मसम्बन्धिनिष्ठत्वंवा तद्धर्मविशिष्टसामानाधिकरण्यस्यैव व्याप्तित्वसम्भवेन भागान्तरस्या प्यनुपादानापत्तेः । वक्ष्यते च मूलमननुरुध्य स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणाः तद्धर्मावलीढ़सामानाधिकरण्यं व्याप्तिरिति व्याप्तिग्रहोपायशेषे दीधितिकृतैव ।

केचित्तु–सामान्यपदस्य व्यापकतार्थकतया हेतुसमानाधिकरणाभाव प्रतियोगितानिष्ठाभाव प्रतियोगितानवच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावत्वं तादृशप्रतियोगितानिष्ठ भेदप्रतियोगिता नवच्छेदकोवा यद्विशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदका वच्छेद्यत्वाभाव इत्येव फलितार्थः । तत्रचाभावद्वयानुपादाने तादृशप्रतियोगितानिष्ठाभाव प्रतियोगितानवच्छेदकं यद्विशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदका वच्छेद्यतात्व मित्य

र्थपर्यवसाने मेयधूमवान् वह्नेरित्यादावतिव्याप्तिः, मेयधूमत्व विशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदकावच्छेद्य तात्वस्य गुरुतया ऽयोगोळक भेदाभावप्रतियोगितानिष्ठ तादृशावच्छेदका वच्छेद्यत्वाभाव प्रतियोगिताया मप्यनवच्छेदकत्वात्। विशिष्य तत्प्रतियोगितावच्छेदकावच्छेद्यत्वत्वरूपेणच व्यापकत्व मशक्यनिवेशनं, वह्न्यादि समानाधिकरण ह्रदत्वाद्यभावीया या प्रतियोगिता तत्तदवच्छेदकावच्छेद्यत्वत्वरूपेण धूमादिसमानाधिकरणाभावान्तर प्रतियोगितासाधारणनिरुक्त प्रतियोगितात्व व्यापकत्वाभावा दसम्भवापत्तेः। अभाव द्वयोपादानेच तत्तत्प्रतियोगितावच्छेदकभेदकूटवन्तो ये ह्रदभेदत्वादयो धर्माः तदवच्छेद्यत्वाभावानां प्रत्येकं तथाविधसकलाभावप्रतियोगिता साधारणतया तादृशावच्छेद्यत्वाभावकूटस्य प्रातिस्विकरूपेणा व्यापकतानिवेशात् अतिव्याप्त्यनवकाश इत्याहुः।

अन्येतु - अभावद्वयानुपादाने प्रतियोगितायाः प्रतियोगिस्वरूपत्व मते धूमवान् वह्ने रित्यादा वतिव्याप्तिः, वह्निसमानाधिकरणायोगोळकभेदाद्यभावप्रतियोगिताया मयोगोळकभेदादिरूपायां धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदक महानसवृत्तित्वविशिष्टायोगोळकभेदत्वाद्यवच्छेद्यत्वसत्त्वात्। विशिष्ट भेदत्वाद्यवच्छिन्नविशिष्ट भेदरूप प्रतियोगितातः शुद्धायोगोळकभेदादिरूपप्रतियोगिताया अनतिरेकात्। अभावद्वयोपादानेचा ऽयोगोळकभेदत्वाद्यवच्छिन्न प्रतियोगितायां धूमत्वादिविशिष्टवन्निष्ठो यो भाव स्तन्निरूपितप्रतियोगितात्वावच्छिन्नानवच्छेदक शुद्धायोगोळकभेदत्वाद्यवच्छिन्नत्व सत्वान्नातिव्याप्तिः।

नचैवं वह्निमान् धूमादित्यादौ धूमादिसमानाधिकरण पर्वतादिवृत्तित्वविशिष्ट ह्रदभेदाद्यभावीयविशिष्ट ह्रदभेदात्मकप्रतियोगितायां वह्न्यादिसमानाधिकरणाभाव प्रतियोगितानवच्छेदक शुद्धह्रदभेदत्वाद्यवच्छिन्नत्व मप्यक्षतं, शुद्धह्रदभेदादिरूप तदभावप्रतियोगितातो विशिष्टह्रदभेदादिरूप प्रतियोगिताया अनतिरेका दित्यव्याप्ति रसम्भवो वेति वाच्यम्।

ह्रदभेदाद्यात्मक प्रतियोगितायां शुद्धह्रदभेदत्वावच्छिन्नत्व सत्त्वेपि विशेषण वैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावोपगमादिति ।

तदसत्, विशेषण वैशिष्ट्यावच्छेदेनावच्छेद्यत्वाभावोपगमे धूमवान् वह्नेरित्यादावतिव्याप्तिवारणस्याप्य शक्यत्वात् । अयोगोळक भेदादिरूपायां शुद्धायोगोळक भेदत्वाद्यवच्छिन्नायामपि प्रतियोगितायां किंचिद्विशेषण वैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभाव सम्भवात् ।

नच यादृशयादृशरूपेण प्रतियोगितानां हेतुसमानाधिकरणाभावीयत्वं तादृशतादृशरूपावच्छेदेन तथाविधावच्छेद्यत्वाभाव विवक्षणान्नदोषइतिवाच्यम्, एवं सत्यभावद्वयानुपादानेपि सामञ्जस्यात्, शुद्धेविशिष्टायोगोळक भेदत्वाद्यवच्छेद्यत्वासत्त्वात्; विशिष्टे तत्सत्त्वेनैव शुद्धेतत्सत्त्वे विशिष्टेऽयोगोळक भेदत्वाद्यवच्छेद्यत्वाभावसत्त्वात् शुद्धेप्ययोगोळक भेदादिरूपप्रतियोगित्वे तादृशाभावसत्तायादुर्वारत्वादभावद्वयोपादानेप्यतिव्याप्तितादवस्थ्यात् । प्रतियोगिता धर्मिकावच्छेद्यत्वाभाव घटितव्याप्तिपक्षे प्रमेयवह्निमान् धूमादित्यादौ साध्यतावच्छेदक निरूपितस्वरूपसम्बन्धरूपावच्छेद्यत्वाप्रसिद्ध्या तत्रतदभाव घटितलक्षणासम्भवात - निरुक्तपारिभाषिकावच्छेद्यत्वाभाव घटितलक्षणस्यादरणीयत्वेपि वह्निमान् धूमादित्यादौ लाघवा त्स्वरूपसम्बन्ध रूपावच्छेद्यत्वाभाव घटितव्याप्तिरेवोचिता, साध्यतावच्छेदकभेदेन व्याप्तिभेदात् ।

नचैव मनवच्छेदकत्व घटितव्याप्तिपक्षेपि धूमवति क्वचिद्वह्न्यभावसत्त्वेपि प्रमेयवह्नित्वं गौरवा द्धूमसमानाधिकरणाभाव प्रतियोगितानवच्छेदकमिति भ्रमदशायामनुमिति वारणाय गुरुधर्मावच्छिन्नसाध्यकव्याप्ति शरीरे पारिभाषिकावच्छेदकत्वाभावस्यैव निवेशेपि वह्नित्वावच्छिन्न साध्यकव्याप्तिशरीरे स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव एवलाघवा न्निवेशयितु मुचितइतिवाच्यम्, धूमादिसमानाधिकरणाभाव

तत्सम्बन्धावच्छिन्न साधनसमानाधिकरणात्यन्ताभाव प्रतियोगिता सामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः । यत्र सद्धेतौ साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति ।

प्रतियोगित्वीय स्वरूपसम्बन्ध रूपावच्छेदकत्वाभावस्य धूमादिव्यापकतानवच्छेदक कम्बुग्रीवादिमत्त्वादि साधारणतया व्यापकतावच्छेदकतानात्मकत्वेन वह्नित्वादिधर्मिकानवच्छेदकत्वज्ञानस्या प्यहेतुत्वादिति केषाञ्चिन्मतमाह (यत्रेति) यद्रूपावच्छिन्न साध्यकइत्यर्थः । प्रमेयवह्नित्वादौ गौरवप्रयुक्ता नवच्छेदकत्वग्रहदशायां भ्रान्तानां द्रव्यत्वादिव्यभिचारि लिंगेन तद्रूपावच्छिन्न साध्यकानुमिते रनुरोधेनासल्लिंगकलघुरूपसमनियत गुरुधर्मावच्छिन्न साध्यकानुमितावप्यवच्छेद्यत्वाभावघटित व्याप्तिपक्षे पारिभाषिकावच्छेद्यत्वाभावज्ञानमेव यद्यपि हेतुः, तथापि वास्तविकीव्याप्तिः सद्धेतावेवेत्यभिप्रायेण " सद्धेता " वित्युक्तम् ।

" वदन्ती " त्यस्वरसस्सूचितः । तद्बीजश्च - यदि गुरुधर्मावच्छिन्नसाध्यकस्थले पारिभाषिकावच्छेद्यत्वाभावज्ञाना दनुमिति स्तदा वह्नित्वाद्यवच्छिन्न साध्यकस्थले तज्ज्ञानान्नानुमिति रित्युक्ते रनुभव विरोधेनासम्भवः, एकजातीयपरामर्श सत्त्वे विषयस्वभावा त्क्वचिदेवानुमितिः क्वचिन्नेत्यननुभवात्, अन्यथा यत्र व्यतिरेकिणि केवलान्वयित्वभ्रमदशायां नानुमितिस्तादृशव्यतिरेकि साध्यके साध्यवदन्यावृत्तित्वमेव व्याप्तिः -नतु व्यापकसामानाधिकरण्यं - गौरवात् - इत्युक्तिसम्भवेनमूलकृतो व्यापकसामानाधिकरण्यमालम्ब्य सिद्धान्तप्रणयन विरोधापातात् । एवं समवायेन भेदप्रतियोगितावच्छेदक जातित्वाद्यवच्छिन्न साध्यकानुमितौ स्वरूपसम्बन्धरूपावच्छेद्यत्वाभावज्ञानस्यहेतुत्वे हेतुसमानाधिकरणात्यन्ताभाव प्रतियोगितायां नित्यत्वादेर्वैयर्थ्येन समवे-

गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्

तत्वादिक मेवावच्छेदकं, नतु तद्घटित जातित्वादिकमिति ज्ञानदशायां हेतौ तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाव सामानाधिकरण्यग्रहेपि [व्यभिचारिहेतुनाऽभ्रान्तानां] जातित्वाद्यवच्छिन्न साध्यकानुमित्यापत्तिः, भेदप्रतियोगितायां जातित्वाद्यवच्छेद्यत्वप्रसिद्ध्या तदभावज्ञानस्यप्रमात्वात् । एवमभावप्रतियोगितावच्छेदक महानसीय वह्नित्वादेर्वह्नित्वादिसमनैयत्य भ्रमेण गौरवप्रयुक्तानवच्छेदकत्वभ्रमदशायां हेतौ तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहेपि महानसीय वह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्रसंगइति तद्रूपावच्छिन्नसाध्यकानुमितावपि स्वरूपसम्बन्धरूपावच्छेद्यत्वाभाव ज्ञानस्य हेतुत्वासम्भवः । वस्तुतो भेदप्रतियोगितायां प्रसिद्धस्वस्वरूपसम्बन्धरूपमहानसावृत्ति द्रव्यत्वाद्यवच्छिन्नत्वस्य संयोगसम्बन्धावच्छिन्नत्वस्यच द्वयोर्व्यतिरेको धूमादिसमानाधिकरणाभाव प्रतियोगितासामान्ये वर्तते, संयोगादिसम्बन्धावच्छिन्न प्रतियोगितायाः शुद्धमहानसावृत्तित्वादिनैवावच्छेदादिति – स्वावच्छेद्यत्व घटितोभयाभावव द्धूमादिसमानाधिकरणाभावप्रतियोगितासामान्यकत्वं धूमादिव्यापकतानवच्छेदक महानसावृत्तिद्रव्यत्वादि साधारणतया नव्यापकतावच्छेदकता स्वरूपमिति वह्नित्वादावपि तज्ज्ञानं नानुमितिजनकं, अवच्छेदकत्वाभावघटितव्याप्तिपक्षेपिवह्नित्वाद्यवच्छिन्नसाध्यकस्थले स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव ग्रहस्य हेतुताया एतादृश युक्तेरेवा नवकाशात् । इत्यादिकं बोध्यम् ।

केचित्तु – पारिभाषिकावच्छेद्यावच्छेदकभाव घटितव्याप्तौ उक्तरीत्या प्रतियोगिवैयधिकरण्यानिवेशेन लाघवात् सर्वत्रैव तद्घटित व्याप्तयादर उचित इत्यस्वरसबीजमाचक्षते ।

गुरुधर्मस्यापि स्वरूपसम्बन्धरूप मवच्छेदकत्वं व्यवस्थाप्य तद्घटितव्याप्तिं परिष्कुर्वताम्मतमाह (गौरवप्रतिसन्धानदशायामिति)

नास्तीतिप्रतीतिबलात् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः ।

घटत्वाद्यपेक्षया कम्बुग्रीवादिमत्त्वादौ गुरुत्वज्ञानदशाया मित्यर्थः (इति प्रतीतिबलादिति) इत्याकारिकायाः कम्बुग्रीवादिमत्त्वाद्यात्मकप्रतियोगिविशेषणांशे प्रतियोगितावच्छेदकत्वावगाहिन्याः प्रतीतेर्बलादित्यर्थः । भवतिचेतिशेषः । गौरवस्यावच्छेदकता व्यावर्तकत्वे गौरवज्ञानस्यावच्छेदकताग्रहविरोधिताप्रसङ्गेन तद्दशायां तादृशप्रतीत्यनुपपत्तिरितिभावः । उक्तप्रतीतेरवच्छेदकतांशे प्रमात्वस्य सविवादतया तादृशप्रतीते रवच्छेदकता साधकत्वमुपेक्ष्य गौरवज्ञानकालीन तादृशप्रतीत्यनुपपत्तिः साधकतयोपन्यस्तेतिध्येयम् ।

नच कम्बुग्रीवादिमान्नास्तीति प्रतीतावच्छेदकत्वं नप्रकारः, अपितु संसर्गएवेति तदंशे सम्बन्धविशेषावगाहित्व तत्प्रकारकत्व घटितभ्रमत्वमप्रसक्तामितिवाच्यम् । भ्रमत्ववत्प्रमात्वस्यापि प्रकारतादिघटितत्वेन प्रमात्वविवादानवकाशात् ।

वस्तुतस्तु कम्बुग्रीवादिमत्त्वावच्छिन्न प्रतियोगिताकत्वमभावे प्रतियोगिसम्बन्धः, कम्बुग्रीवादिमत्त्वावच्छिन्नत्वा प्रसिद्धिपक्षेपि विशेष्यविशेषणभावापन्नानां प्रतियोगित्वावच्छिन्नत्व कम्बुग्रीवादिमत्त्वानां सम्बन्धघटकता, एवंच तेषां परस्परं सम्बन्धभानमप्यावश्यकं, तेनविना विशेष्यविशेषणभावा निर्वाहात् । संसर्गसंसर्गोनविशिष्टधीविषयइति प्रवादस्यच संसर्गघटकवस्त्वन्तराविशेषणत्वेन यस्यसंसर्गता तत्संसर्गोनभासतइत्यर्थः । तथाचोक्तप्रतीते रवच्छिन्नत्वे कम्बुग्रीवादिमत्त्वभ्रमत्वं गुरुधर्मस्या नवच्छेदकत्ववादिनां निष्प्रत्यूहमेव, संसर्गताविशेषसाधारण संसर्गविशेषावच्छिन्न विषयतात्वरूपेणैव प्रकारताया भ्रमत्वघटकतोपगमात् । प्रकारतात्वं पुनरखण्डधर्मान्तरं संसर्गताव्यावृत्तमेव, अतो नसंसर्गविशेषभाने तज्ज्ञानापेक्षा, तादृशधर्मपुरस्कारेणैव विषयताविशेषस्य विशेषणज्ञानजन्य

नचास्या स्तत्प्रतियोगिकाभावमात्रमवलम्बनं, तथाविधयत्किञ्चिद्व्य क्तिसत्त्व एव तादृशप्रतीतेरनुदयात्। अतएवैकघटवति भूतले कम्बुग्री वादिमान् नास्तीतिशब्दो न प्रमाणं, प्रमाणञ्च घटसामान्य

तावच्छेदकत्वात्। इत्थञ्च नोक्तप्रतीतेः प्रतियोगितायां गुरुधर्मावच्छि न्नत्व साधकतेत्यवधेयम्।

गौरवप्रतिसन्धान कालीनायां कम्बुग्रीवादिमान्नास्तीत्याकारि-कायामपि प्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नभा सते, अपितु तत्सामानाधिकरण्यमात्र मित्याशंकते (नचेति) (तत्प्रतियोगिकेति) कम्बुग्रीवादिमत्त्वाद्याश्रय प्रतियोगिकेत्यर्थः। "अवलम्बनं"-विषयः(तथाविधेति) कम्बुग्रीवादिमत्वाश्रयेत्यर्थः (तादृश-प्रतीतेरनुदयादिति) तथाच तस्यास्तत्प्रतियोगिकाभाव मात्रावलम्बनत्वे यत्किञ्चिद्घटादिमत्यपि तथाविधघटाद्यभावस्या बाधेन तादृशप्रती तिः स्यादेवेति भावः (अतएवेति) यतएव कम्बुग्रीवादिमा न्नास्ती त्यादि प्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नियम तो भासते, गुरुरपिच धर्मः प्रतियोगितावच्छेदकः, अतएवे त्यर्थः। (एकघटवतीति) प्रतिपादकत्वं शब्दान्वयितया सप्तम्यर्थः। 'भूतल' इति ज्ञानाकारान्तर्गतम्। 'एकघटवति' 'भूतल'इत्यनयो र्मिथोन्वये तदु-त्तरमत्रेति ज्ञानाकारान्तर्गतं पूरणीयम् (न प्रमाणमिति) तादृशप्रती ते रवच्छेदकत्वावगाहित्वा नियमे एतादृशशब्दजन्य तादृशप्रतीतेः प्रमात्वस्यापि सम्भवेन प्रमाणमपि स्यादित्युपष्टम्भ संगतिः (प्रमाणं-चेति) गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे बाधितावच्छेदकत्व ग्रा-हकतया तादृशशब्दोपि प्रमाणं न स्यादित्युपष्टम्भः।

एतेन गुरुधर्मस्यावच्छेदकतायां युक्त्यन्तरमपि दर्शितम्। नच कम्बुग्रीवादिमा न्नास्तीति प्रतीतौ कम्बुग्रीवादिमत्त्वविशिष्ट सम्बन्ध

शून्ये । नचेदेवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः, गुणादिगुणकर्मान्यत्व विशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगिताया लाघवेन द्रव्यादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् । तत्तदवच्छेदकत्व व्यक्तीनाञ्च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात् ।

निष्ठाभाव प्रतियोगितानवच्छेदक रूपावच्छिन्न प्रतियोगिताकत्वमेव संसर्गतया भासत इत्युपेयम्, तथाच गुरो रनवच्छेदकत्वेपि नोक्त दोषावसर इति वाच्यम् । तत्त त्प्रतियोगितावच्छेदक भेदाना मनन्तानां सम्बन्धघटकत्वे मानाभावात्, गौरवाच्च । गुरुधर्मस्यानवच्छेदकत्वे द्रव्यं गुणात् गुणकर्मान्यत्वविशिष्ट सत्त्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वत्वस्य द्रव्यनिष्ठाभाव प्रतियोगितावच्छेदकत्वत्वरूप समनियत धर्मापेक्षया गुरोः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या ऽव्याप्तिरपीत्याह (नचेदिति) " एवं "- गुरो रवच्छेदकत्वं (लघुरूपेति) विशेषणानवच्छिन्न द्रव्यत्वा दीत्यर्थः । अधिकगौरवप्रदर्शनाय विशिष्टसत्तारूप हेत्वनुसरणं । (लाघवेनेति) गुणत्वावच्छिन्नप्रकारेण हेतुमन्निवेशापेक्षया निर्विशेषण द्रव्यत्वादिपुरस्कारेण तन्निवेशे लाघवादित्यर्थः ।

ननु हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकतानां तादृशावच्छेदकत्वत्वेन नाभावो व्याप्तौ निवेशनीयः, किन्तु तत्तद्व्यक्तित्वेन सर्वेषा मभावकूटएवेति तादृशावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि न क्षतिरित्यत आह (तत्तदवच्छेदकत्वेति) (प्रातिस्विकेति) तत्तद्व्यक्तित्वेनेत्यर्थः (ज्ञातु मशक्यत्वादिति) अनन्तानां तादृशावच्छेदकत्वरूप प्रतियोगिनां प्रतियोगितावच्छेदक तत्तद्व्यक्तित्वेन ज्ञानासम्भवादिति भावः । निर्विशेषणक स्वघटितधर्मापेक्षया विशिष्टस्व घटितस्य गौरवेणानवच्छेदकत्वनिबन्धना मव्याप्ति-

एवं द्रव्यत्वत्वादि विशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगो ऽनुसन्धेयः । उपदर्शितप्रकारस्यापि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् । अतएव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि सङ्गच्छत इत्यपि केचित् । इति कृतं पल्लवितेन ।

इति श्री रघुनाथ शिरोमणि विरचिता

अवच्छेदकता निरुक्तिः ।

माह (एवमिति) रीत्येति शेषः (अव्याप्यत्वप्रसंगो ऽनुसन्धेय इति) अतो गुरोरवच्छेदकत्व मावश्यकमेवेति शेषः । अत्रैव हेत्वन्तरमप्याह (उपदर्शितप्रकारस्यापीति) अपि दुर्ज्ञेयत्वादित्यनन्तरं योज्यः । 'उपदर्शितप्रकारस्य' - मेयधूमवान् वह्नेरित्यादा वतिव्याप्तिवारणाया नुसृतस्य पारिभाषिक हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वस्य । "स्वत्वा दी"त्यादिना प्रातिस्विकरूपावच्छिन्न तत्तत्प्रतियोगितापरिग्रहः (दुर्ज्ञेयत्वादिति) तथाच गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे गुरुधर्मावच्छिन्न साध्यकव्यभिचारि व्यावृत्त शक्यज्ञानकव्याप्तिनिर्वचन मप्यशक्यंस्या दिति भावः। उक्तस्थले हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदकतात्वस्य गुरुतया स्वरूपसम्बन्धरूप प्रतियोगितावच्छेदकत्वासम्भवेपि उक्तरीत्या पारिभाषिक तदीयप्रतियोगितावच्छेदकत्वस्यैव व्याप्तौ निवेशनीयतया न तदवच्छिन्नाभावाप्रसिद्धि निबन्धनाव्याप्तिरित्याशंकया " उपदर्शिते " त्यादि ग्रन्थावतरणन्तु न सम्भवति, तादृशावच्छेदकत्वत्वनिष्ठ तथाविधावच्छेदकतायां स्वपदेन तन्मात्रस्योपादानात्, तादृशावच्छेदकत्वत्वविशिष्ट व्यापकतावच्छेदका वच्छिन्नाभाव निवेशस्य पर्यवसितत्वात् (व्यभिचारित्वमपि संगच्छत इति) व्यभिचारस्य साध्यतावच्छेदका वच्छिन्नाभावव-

द्वृत्तित्वरूपत्वात, गुरुधर्मस्यानवच्छेदकत्वे घ्राणग्राह्यगुणत्वाद्यवच्छिन्नप्र-
तियोगित्वाप्रसिद्ध्या तदनुपपत्तेरितिभावः ।

नच साध्यतावच्छेदक विशिष्टव्यापकतावच्छेदकावच्छिन्नाभाव
मानाधिकरण्यमेव व्यभिचारइत्युक्तस्थले गन्धत्वाद्यवच्छिन्नाभावमा-
त्र व्यभिचार उपपादनीय इतिवाच्यं, व्यापकतावच्छेदकता शरी
साध्यतावच्छेदक विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानां विशेष्यी
दयतया तत्तत्प्रतियोगितावच्छेदकभेद कूटस्यान्तर्भावनीयत्वेन व्य-
चारज्ञानस्याशक्यतया ऽनुमितिविरोधित्वासम्भवेन व्यभिचारस्यहेत्वा
सतानुपपत्तेः ।

एतेन - व्यभिचारज्ञानाभाव सहकृतसामानाधिकरण्यज्ञानस्य सा-
क्षादनुमिति हेतुतामतावलम्बना सम्भवोपि दर्शितः ।

इदमुपलक्षणं- जलं घ्राणग्राह्य गुणवत् , उत्पत्तिकालावच्छिन्नो घटः
घ्राणग्राह्यगुणवानित्यादौ बाधानुपपत्तिरपिद्रष्टव्या ।

इति श्री महामहोपाध्याय श्री गदाधरभट्टाचार्य
विरचिता

अवच्छेदकतानिरुक्तिः ॥